CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

T. No. 830 (h)
153

कामिकागमः

विद्यापादः ॥

copied from:
RE. 39767 Pages 1-80
RE 40.042 Pages 1-126

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

T. No. 830 (a)
Copied from RE 40.042
of this Institute

कामिकागमः
(विद्यापादः)
(प्रथमः पटलः)

. . . समाकर्ण्य विस्तरात्परमेशितुः।
अङ्गाङ्गिभावसंयुक्तं परापरसमाश्रयम् ॥ 1
त्रिकालविविधोल्लासिनानासिद्धसमन्वितम्।
मुनिमार्गैकनिश्रेणिं सर्वाश्चर्यप्रदर्शकम् ॥ 2
मुनयोऽद्भुतसंलग्नहृदयाः पुलकाञ्चिताः।
प्रणम्य दण्डवद्भूमौ रत्नजालोलसत्त्विषि ॥ 3
बद्धाञ्जलिपुटाः सर्वे स्तोतुमारेभिरे मुदा।

ऋषयः —

नमस्ते परमानन्दप्रदाय विमलात्मने।
अनन्यवक्तुकामन्तत्परिज्ञानपरायिने ॥ 4
स्वकचिद्रूपया नित्यामाश्लिष्टाय चिदात्मने।
परनादपरिक्षोभकारिणे करणाय ते ॥ 5
पशूनामपि सत्त्वस्यादायिने पतिरूपिणे।
स्वतन्त्राय जगत्तन्त्रसूत्रधाराय ते नमः ॥ 6

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

षडध्वातीतरूपाय मन्त्रैश्वर्यविधायिने ।
इच्छाज्ञानक्रियाशक्तिविभिन्नपरशक्तये ॥ ७

ईशानाद्यादिविद्यानां प्रवक्त्रे वाङ्मयस्य ते ।
भूतानामादिभूताय महसे महसामपि ॥ ८

कर्तॄणामादिकर्त्रे च प्रतिकर्त्रेऽन्तकस्य च ।
अनुग्रहाय भक्तानां स्वेच्छाकल्पितमूर्तये ॥ ९

नानामन्त्रसमावेशशालिने घोररूपिणे ।
नादबिन्दुकलाभेदविभक्तपरशक्तये ॥ १०

सर्वोपनिषदुद्गीतस्वरूपाय महौजसे ।
भक्तिमात्रैकलभ्याय साम्बिकायाष्टमूर्तये ॥ ११

इति स्तुवन्तस्ते सर्वे भक्त्या प्राञ्जलयो द्विजाः ।
परशक्तिनिपातातिशयोल्लसच्चेतसः ॥ 12.

आनन्दबाष्पसंभिन्नदृशः पुलकभूषणाः ।
स्मयमानमुखाम्भोजमूचुश्चन्द्रार्धशेखरम् ॥ 13

त्वत्तः श्रुते क्रियाचर्ये योगोऽस्माभिस्तथा प्रभो ।
पशुपाशपतिज्ञानं समाध्यङ्गं पुरोदितम् ॥ 14

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भवता भोगमोक्षैककारणं यत्र तामिति ।
कृपयास्मासु परमं ज्ञानं त्वं शंस च प्रभो ॥ 15
यः पशुस्त्वथवा पाशः पतिर्वा कीदृशो भवेत् ।
का च मूर्तिः कथं सास्यात्पाशबन्धः कथं त्वणोः ॥ 16
सर्वमेतत्प्रपञ्चेन वद चन्द्रार्धशेखर ।
देवो जगाद जलदध्वानगम्भीरया गिरा ॥ 17
कृपार्द्रहृदयः शंभुः कात्रतावधिकारिणः ।
श्रीमदीश्वरः —
साधु साधु भवद्भिर्यज्ज्ञानमिष्टमनुत्तमम् ॥ 18
पशुपाशादिविषयं गुह्याद्गुह्यतरं त्विदम् ।
एतदेव परमृग्यं परश्रेयोऽर्थिभिर्जनैः ॥ 19
ज्ञानमेव परं तत्त्वं ज्ञानमेव परं तपः ।
ज्ञानमेव परो बन्धुर्ज्ञानमेव परो गुरुः ॥ 20
नहि ज्ञानविहीनानामिहामुत्र च किंचन ।
श्रेयोऽर्थी ज्ञानवान् सर्वं विविधं भद्रमश्नुते ॥ 21
ज्ञानवानेव पूज्यो हि बालो वा स्थविरोऽपि वा ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तिर्यक्स्थावरतौल्येन ज्ञानहीनो हि कथ्यते ॥ २२

अज्ञानतिमिराक्रान्तचक्षुषां सद्भिदृक्षताम् ।

नित्योदितोऽस्तनिर्मुक्तो ज्ञ·मेव परोऽपि ॥ २३

अस्य स्वरूपनिष्पत्तिः साधनान्यखिलान्यपि ।

दर्शनानि प्रवर्तन्ते कथयन्ति न कृत्स्नशः ॥ २४

मलिन्यादिभिरुद्गीर्णा आगमा विविधा अपि ।

सर्वे दक्षिणवामादिभेदा रुद्रैः समीरिताः ॥ २५

तथागतानि चान्यानि दर्शनान्यार्हतानि च ।

ज्ञानस्यैव प्रपञ्चार्थः धियतां ते प्रयत्नतः ॥ २६

प्रादेशिकं ज्ञानं तैर्यदुक्त द्विजोत्तमाः ।

प्रपञ्चोऽत्रैव कार्त्स्न्यं च तस्य वै कामिकागमे ॥ २७

विद्यापादेऽत्र तत्सर्वं कथयामि विनागसः । २७½

इति श्रीकामिकाख्ये महातन्त्रे

विद्यापादे प्रथमः पटलः

॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(द्वितीयः पटलः)

ईश्वरः —

तत्रात्मा पशुराख्यातश्चेतनो जीवसंज्ञितः ।
पुण्यपापात्मनः कर्ता कर्मणाविव ..च . 1
तद्फलस्यानुभोक्ता च प्रतिकूलं जिहासति ।
आदिसत्यानुकूलार्थं द्वेष हृष्यति रक्षति ॥ 2
अहंकारोऽतिदेहादौ प्रमाद्यति च शोचति ।
अस्यासूयति साकृतो नितरामभिमन्यते ॥ 3
तथैव प्रतिसन्धत्ते प्राणतीश्व सतीक्ष्यते ।
शृणोति लज्जते शक्तिर्हसत्यु. लयत्यपि ॥ 4
वचो संस्तौति नि . द्युति विमु . ति ।
वक्ति जिं ति संधत्ते ल . यते पिच मार्गते ॥ 5
भावैरनेकैः संभिन्नो निगमानिव संचरेत् ।
असाध्योऽयमलक्ष्योऽयमवद्योऽयमनादिमान् ॥ 6
व्याप्यते व्यापकश्चापि गम्यते गमकेऽपि च ।
असहाय स्वभावश्च साधकः साध्यते स्वयम् ॥ 7
स्वतन्त्रः परतन्त्रोऽपि बाध्यते कर्मणा मुहुः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

चिन्मात्रश्चेतयत्यात्मा स्वयं चेतयते तथा। ८
जगादो · शंराशि पाराशिश्चायं विज्ञताम्॥

अचिन्त्यमहिमाश्चर्यगुणराशिरलौकिकः। ९
निर्वाणपदसाम्राज्ये ममैषो निभिषच्यते॥

स जयत्यखिलं विश्वं प्रेर्यते जनकेन च। १०
बहु(ध)ा कथयन्त्येनं बहव प्रतिपादकाः॥

प्रत्यक्षमपरे प्रो · · र प्रत्यक्षं तथापरे। ११
शब्दमन्ये नुमेयं तन्नास्तीत्येके प्रपेदिरे॥

अणुधर्मोनुमानं तु व्यापकन्त्वापरे गुरुः। १२
अनित्यनित्यमपरे न स द्वितीयं तु केवलम्॥

तत्र केचिदमुं प्राहु शरीरान्नातिरेकिणाम्। १३
यदा पवनभूवारितेजसां मेलनं भवेत्॥

इच्छायत्नसमायुक्त तदा जातवेतना। १४
पदार्थानां स्वभावोऽयं युज्यमानाः परस्परम्॥

पदार्थं जयत्यन्नं हेषचैतद्विलोप्यते। १५
देहपाकानुगुण्येन त्वया ज्ञानं समीक्ष्यते॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ह्रासवृद्धिसमायुक्तं देहधर्मास्पद . तः ॥ 16

देहो जीवति जागर्ति जायते म्रियते तथा ॥

स्थाविरे यादृशं ज्ञानं न तादृग्बालवर्ष्मणि ॥ 17

प्राणेन्द्रियपरित्यक्तो न जानाति न जीवति ॥

सामग्रीविकलत्वेन ज्ञानादेरुद्भवो न हि ॥ 18

मरुदादिसमायुक्तो देह इत्युच्यते बुधैः ।

व्यसुन्नदेहो मृत्किंतु विकलः शेषभू . तः ॥ 19

चित्रादिपटकाद्याश्च परणामो हि वर्ष्मणः ।

तथेन्द्राणि तस्यैव नानार्थान्तरमिष्यते ॥ 20

परिणामविशेषो हि रसवीर्यविचित्रता ।

तथास्य परिणामोऽयं यद्विजानाति विग्रहः ॥ 21

जीवत्कलेबरं प्राहुरात्मानं पदवी द्विजाः ।

तच्चित्तेऽमृतपिण्डेषु स विचारो न युज्यते ॥ 22

न पारलौकिकः किंचित्कर्मास्मिन् कार्यमस्ति वै ।

यस्मादत्रापि न दोषोऽयं रपरत्रानुवर्तते ॥ 23

ऋषयः ——

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

एतदेव समाश्रित्य चैवात्राग्रहनवासनः ।
वर्तन्ते त्यक्तकर्माणः तेषां किं वा फलं भवेत्" २४

ईश्वरः —

प्राणमेवहि तैर्नित्य जिजिविषतया यतः ।
परिध्यायन्ति तंमात्राद्वायौ तेषां लयो भवेत्" २५
अनुभूय परं दुःखनित्यादि क्रमसंभवम् ।
मरुत्तत्र विलीयन्ते यावत्सृष्टिपुनर्भवेत्" २६
स्रष्टा चैषां पुनः सृष्टिजायते नात्र संशयः ।
संयक् ज्ञानविहीनत्वात्पूर्ववासनया युतः" २७
नानायोनिः प्रपद्यन्ते विविध क्रमहेतुकाम् ।
अपरे मन्वते चैनं क्षणिकं चिदमीश्वरम् " २८
संवित्तिर्दृश्यते देहे स्वयंवेदनरूपिणी ।
सन्तन्यमाना सा चाथ विरता विषयेक्षणात्" २९
दीर्घकालेन सन्तति वस्तुतः क्षणिकैव सा ।
क्रमेण भक्ष्यते सौक्ष्म्यादाशुभाविथाशुभाविथापिच" ३०
क्रमेण मलाविराद्धि यम्यादेषवशागतेः ।

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रत्यर्थं विद्यते ज्ञानं तद्भेदे भिदा भवेत् । 31
यदेकमेव विज्ञानमर्थभेदे हि किं कृतः ॥
न चापालयितुं शक्यो भेदोऽयं वस्तुसंश्रयः । 32
ज्ञानमेव हि जानाति परमात्मानमप्ययदः ॥
न ततोऽस्त्यपरं ज्ञानं वैवर्णाभेदहेतुतः । 33
न हि ज्ञातृद्वयं दृष्टमेकस्मिन्विग्रहे नरैः ॥
तस्माज्ज्ञानं स्वयं वेत्ति स्वभावद्नेतरः । 34
तत्र क्षणिकमित्युक्तं तेनात्मा क्षणिको मतः ॥
एषां तु विधिवैधुर्यं पूर्वेषामिव विद्यते । 35
न चरन्ति हि ते वेदं क्षणिकत्वेन वेदितुः ॥
ज्ञानोत्पत्ति विनाशा तु विचारैकपरा हि ते । 36
बुद्धिकत्वे विलीयन्ते निरयानुभवात् ॥
पूर्वसृष्टिरेषा स्यात्संसारे वासनानुगा । 37
शरीरपरिणामं च केचिदिच्छन्ति चेतनम् ॥
गमागमादिकान् धर्मान् मम संस्ते दि· म्बराः । 38
आत्मन्युपचरन्तो हि आत्मान समुपासते ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तेन तत्त्वे लयस्तेषां मानसे परिकीर्तितः। 39
शक्तिप्रपञ्चविन्यासनिरताः कश्चिदागताः॥
आत्माद्वैतः प्रभासन्ते बहुधा कश्यते कश्यतेव यत्। 40
यागि संविष्ट नाना जातिभुवा नृणाम्॥
अशियन्त्रणप्रत्यर्थं मद्वैतं प्रतिपैद्रिरे। 41
तच्च चित्त्वमहत्तन्तु सर्वाश्चर्यमयं च तत्॥
कल्पितं बिम्बितश्चेति प्रभृति हि तदुच्यते। 42
अचिन्त्यशक्तिविश्वात्मा परमात्माभि कथ्यते॥
स एव जगदाकारं निजशक्तितः। 43
फलमूलप्रवालादिरूपेण लतिका यथा॥
प्रवर्तते चित्रमयी तथैवैका वयं यथा। 44
उपादानादुपायेन न भिन्न दृश्यते यथा॥
हेम्नः कुण्डलकेयूरमकुटादीनि नो पृथक्। 45
तथैवायमुपादानं वर्तते जगदात्मना॥
न शरीरात्मनो भेदः कथंचिदुपलक्ष्यते। 46
तथा तस्माच्च बाह्यानामर्थानान्यभिदा भवेत्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तत एव समुत्थाय जगन्ति विविधान्यपि । 47
तस्मिन्नेव विलीयन्ते भास्करे रश्मयो यथा ॥

आत्मा हि केवलः शुद्धः सोऽयं विज्ञानलक्षणः । 48
तेन नान्यद्विजानाति विहायात्मानमञ्जसा ॥

नासौ यन्न विजानाति तदस्तीति कथं भवेत् । 49
ज्ञानाद्धि यज्जगद्रूपं स्वप्नवत्तत्प्रपद्यते ॥

तेन चित्रमयो ह्येषो न च यत्परिमाणवा । 50
जाग्रत्स्वप्नविभेदेऽपि किमिदं स्वात्मसाक्षिणि ॥

ज्ञानमात्रं निरालम्बं तदाश्चर्यप्रदर्शकम् । 51
न कश्चिदत्र प्रसरे तर्कहेतुप्रदर्शने ॥

शतधा तर्कमानेऽपि स्वप्नहेतुर्न विद्यते । 52
स्वरसच्छेदपश्चात्व व्योमे याना हि साक्षिणि ॥

तेनाभू . रनमात्मानं . . ाश्चर्यमयं द्विजाः । 53
तदेकस्य शरीरादेरसत्वान्न भिदात्मनः ॥

अथांशदेवभुवनं भ्रान्त्यात्मा प्रतिपद्यते । 54
स्वरूपाननुसन्धानाच्छुक्तौ रजतवद्विभुः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अविद्यानादिसिद्धास्य विश्व भ्रात्येककारणम् । 55
यथैवोन्मादकं द्रव्यमुन्मत्तानां यथा तथा ॥

यथा च चित्रपलके तरुणीरूपचित्रिते । 56
औन्नत्यं स्तनयोन्नाभौ निम्नता लक्ष्यते समे ॥

तथैवा ज्ञानमुकुरे जगद्भ्रान्त्या प्रकाशते । 57
जीवानेता प्रदन्यन्ते न भिन्नात्परमात्मनः ॥

एक एव महात्मायं देहे देहे व्यवस्थितः । 58
यथैक एव देहेऽस्मिन् प्रत्यक्षं ह्येष वर्तते ॥

न च ज्ञानसमानत्वं रूपमेकत्र पश्यति । 59
शृणोति जिघ्राति स्पष्टं रसवत्तापि संस्पृशेत् ॥

एवं विलक्षणं भुङ्क्ते प्रतिदेह . . महान् । 60
प्रतिसन्धानराहित्यं बाल्यस्थविरवद्भवेत् ॥

विविधा स्वयमेवैकः परमो बुद्धिवृत्तिषु । 61
प्रतिबिम्बितमात्मानं नाना पश्यति भानुवत् ॥

जलाधारेषु भिन्नेषु यथैकं भानुमण्डलम् । 62
अनाकुलमनाशङ्कः नानेति पद्यते जले ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

चलति मार्तोश्चलति तिमितिर्यथा । 63
तदा बुद्धिगुणान् सर्वानात्मन्यारोप्य पश्यति ॥
न लिप्यते ततः पुण्यात्पापकर्मभिरञ्जसा । 64
नेति नेति निराकृत्य सर्वदेहेन्द्रियादिकम् ॥
तस्मिन्निषेधेनाक्रामो तमात्मानं जगुः परे । 65
आत्मा तन्मात्रतन्त्रोऽयं ज्ञातेनैव विशिष्यते ॥
विशेषकाणां व्यावृत्तौ चिन्मात्रमवशिष्यते । 66
तदेकमविशिष्टत्वादेक एवायमिष्यते ॥
एवाद्वैतनिष्ठानां पुंतत्त्वे विलयो भवेत् । 67
लिप्यन्ते विविधैर्द्वैतैर्विध्यन्ति क्रमजन्मभिः ॥
अद्वैतबलमाश्रित्य विश्वं . . . लवृत्तयः । 68

इति कामिकाख्ये महातन्त्रे

विद्यापादे

द्वितीयः पटलः

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ऋषयः —

बहुप्रकारश्रवण न पर्याकुलित जन्मनः ।

किंरूपस्तत्वतस्त्वेषस्तदेतद्विशद्वद ॥ 1

ईश्वरः —

यदुक्तं पूर्वमस्माभि स्वरूपं तस्य सुव्रताः ।

यत्तदेव परं तत्त्व भूयश्च कथयामि वः ॥ 2

नित्यज्ञानमयो ह्येषा वार्ताज्ञानाच्च शाश्वतः ।

व्यापकोऽपि शरीरेऽस्मिन् वर्तते स्वापत्प्रभुः ॥ 3

नापि देहो न चाक्षाणि न प्राणो न मनस्तथा ।

नाहंकारो न बुद्धिः स्यान्नित्यत्वाज्ज्ञातृभावतः ॥ 4

शरीरे दृश्यते नैव ज्ञानं मरणधर्मतः ।

जीवत्यपि सुषुप्त्यादौ व्यासङ्गे चैव लक्ष्यते ॥ 5

अतः प्रदीपवद्भाति प्रेरयन्नखिलं वपुः

प्रत्यक्षं परिणामेन देतत्स्यान्यत्र शालिनः ॥ 6

प्रातिसन्धानमर्थेषु कथंचिन्नोपपद्यते ।

उह्यमाने शरीरे परमं शिवमन्यते ॥ 7

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अज्ञानसिद्धतत्त्वाङ्गसंस्कारं विशदः खलु ।
. . . . शिथिलो भवेत् ॥ 8

2a प्रयत्नो देहधार्यार्थे सर्वसिद्धस्य . . दिनः ।
तदा सुखिनमात्मानं मन्यते . विसर्जनात् ॥ 9

अनित्यमाने यतते वहनाय पुनः स - - ।
तदा खिद्यान्नपि पुमानखिद्यान्निव मन्यते ॥ 10

अज्ञानसिद्धतत्स्वाभसंस्कारवशतः खल : ।
वर्ष्मणस्वपरोद्धारे खेदाखेदानुभावकः ॥ 11

लक्ष्यते यः स एवात्मा स च देहात्परो मतः ।
तदस्यामभिजीवत्वे खेदाखेदोपपन्नता ॥ 12

प्रयत्नस्य तु शैथिल्यं न ह्यात्माश्रयतोचिता ।
तथा च धारणाभावात्सुप्तोप . न विग्रहः ॥ 13

इहोपि न शरीरस्चैतन्यमिति . . . द्यताम् ।
त्वगसृङ्मांसमेदोऽस्थि मज्जाशुक्ला विनिग्रहः ॥ 14

त्व . ाप्तिर्यावती तावानेष नातोऽधिको मतः ।
चैतन्यवरणेयास्ते कलया वृत्तिलीलया ॥ 15

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पञ्चेन्द्रियस्वदेहस्य यदेव स्यादनवृतम् ।
प्रज्ञानतो निःसरति आतोद्यमिव वादकम्" 16
यावत्यालोकसहितं चक्षुर्व्याप्नोति मण्डलम् ।
प्रज्ञावमिति सा ज्ञासे बहिरर्थावमर्शनी " 17

ऋषयः —

बहिर्देहाद्बहिः क्वापि वृत्तिर्वानोम्मता बुधैः ।
जीवस्य तत - · ब्रूबे बहिर्जानात्यसाविति " 18
ईश्वरः प्राणिनास्त्राता प्रवर्तते मुनीश्वराः ।
आत्मा त्वक्षीण्यधिष्ठाय न च देहं मपेक्षिते " 19
अक्षाणीप्यूह सिद्ध्यर्थमपेक्षन्ते वपुध्रवम् ।
तुषन्तमुञ्जा यवयवद्देहात्पश्चाच्चितः पुनः " 20
विना तु करणैरात्मा न किंचिदवगच्छति ।
तस्माद्बहिरधिष्ठाय चक्षुरर्थान् समीक्षते " 21
तथा तत्तदधिष्ठानां शृणोति स्पृशति ध्रुवम् ।
जि · · त्यपि च सौरभ्यं रसादास्वादयत्यपि " 22
अतोऽस्य न बहिर्वृत्तिरीदृशी चेन्न दुष्यति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

एतेनैवास्य संसिद्धं व्यापकत्वं सुव्रताः। २३
इयत्या चक्षुषो व्याप्तेर्युतो नैव न लभ्यते॥
अतोत मानत्वाद्व्यापकत्वे जगस्यताम्। २४
प्राणस्यापि न चैतन्यमनेनैव हि भाषितम्॥
न शरीराद्बहिस्तस्य प्रवृत्तिः क्वापि लभ्यते। २५
अत एव मनो नात्मा न बुद्धिर्नाप्यहंकृतिः॥
स्मरणात्प्रातिसन्धानान्नेन्द्रियाण्यपि चेतसः॥ २६
अहमेव तु पश्यामि ..शामिरस्य यामि च॥
न ह्येतदपीन्द्रियात्मत्वे कथंचिदुपपद्यते॥ २७

ऋषयः —

सुदृढे पादपाण्यौ प्रवृत्ति स्वतपेक्षते॥
दुर्बले तु भवत्यस्मिन् न चादृढा मनागपि। २८
नानात्वे पुनरेषा स्यादनयोर्नियमः कथम्॥
अन्यस्मिन् दुर्बलेनैव भवेदन्योऽपि दुर्बलः। २९
ईश्वराणां तनुस्तस्य प्रवृत्तौ नित्यमिष्यते॥
करणाशक्तितः कर्तुरशक्तिरिव लक्ष्यते। ३०

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शक्तोऽपि करणाभावान्न करोतीति गम्यताम् ॥

सदंशेन दृढो नायमपिण्ड आकृष्यते यथा । 31

न भङ्गुरेणाति शिथिलेनाति सुव्रताः ॥

एवमेष शरीरेऽस्मिन् शिथिलेन प्रवर्तते । 32

दौर्बल्यं न यथाक . न तथा सोऽतिलक्ष्यताम् ॥

मनसो नात्मता चैवं बहिस्तस्या प्रवर्तनात् । 33

न बहिर्ज्ञानमस्तीति पूर्वमेवोपपादितम् ॥

करणान्तरसापेक्षां तच्चेन्नात्मान्तरं तथा । 34

ह्यस्यैव करणं त्वंतु कथंचि . ेपलभ्यते ॥

सशक्त्या नियमेनासौ मनःप्राणौ समीरयेत् । 35

यदधीना तयोर्वृत्ति सजातीह लक्ष्यताम् ॥

. या हरति यः प्राणं सर्वाङ्गं प्रसृतं बल . । 36

प्रसारयति साङ्गेषु धरत्यपि च कुत्रचित् ॥

संकोचयति साङ्गानि प्रमोदे च विकासयेत् । 37

धातुक्षोभं ध्रुवं पश्येदयं देवे भवेद्यति ॥

पिलकादिकरूपेण नवा परिणमेद्दपि । 38

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अजानतः प्रवर्तेत भानिष्टेषु कश्चन ॥
उत्पद्यमान गदन्नहि जानात्यहं पशुः ॥ 39
तथा परिणतेनोक्तदेहस्यादागतो मतः ॥
अतो न देहे तद्भावः कथमप्युपपद्यते ॥ 40
सप्तधा तु महाम्बोधि परिते वलराष्ट्रके ॥
दृष्टार्थसाध्यकैरङ्गस्वभूत्यै परीवारितः । 41
प्राणायामिक संशुद्धे हृत्पद्ममय सत्मनि ॥
राजायते ह्यदेवेऽपि विजिगीषुर्महारिपून् । 42
तत एव स आत्मापि पदार्थान् शुद्धसंज्ञितान् ॥
आवापोद्वापयोगेन तेनैवोक्त स्वयं प्रभुः । 43
यथातपो यथा व्योम घटे गच्छन्ति पूर्यते ॥
तत्र तत्रैव मेषोऽपि देहे संबध्यते मुहुः । 44
ऋषयः —
हृदये स्मरणं दृष्टे यत्र तत्रापि वर्तनम् ॥
देशान्तरे तु विज्ञाने बहि स्यान्मरणं पशोः । 45
यत्रानुभवनिष्पत्तिस्तत्र संस्कारकस्मृतिः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

युक्त्यानन्यत्र संस्कारोऽनुगच्छन्ति देहवत् । 46

ईश्वरः —

पाददेशे त्वया स्पर्शज्ञानेऽपि हृदये स्मृतः ॥

तेनैकदेशे नियमो नानयोरपि सुव्रत । 47

संस्काराधानमात्रं हि प्रार्थ्यते स्मरणं प्रति ॥

तस्मिन्नुद्बोधिते तत्तु जानन्ते यत्र कुत्रचित् । 48

सद्योगवृत्तिसाम्येऽपि तेन तस्य महर्षयः ॥

नित्यं कृत्यमले तेन तत्रैव स्मरणं भवेत् । 49

यन्निराक्रियते भूम्ना कलयास्य मलः पशोः ॥

यत्र यत्र कलायोनस्तत्र तत्र हृदि स्मृतिः । 50

नानाविधानि कर्माणि तस्येषन्ति प्रमादतः ॥

बुद्धिपूर्वं च तद्भावायेन विश्वं प्रपूर्यते । 51

विश्वभूर्विश्वकर्तेति तेनायं परिपठ्यते ॥

कर्मणा नियतः सोऽयमवशादेव योनिषु । 52

इति कामिकाख्ये महातन्त्रे विद्यापादे

तृतीयः पटलः ॥

श्री

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(चतुर्थः पटलः)

न चास्य क्षणिकं ज्ञानं सर्वकालोऽनुवर्तकाम्।
यावज्जागर्ति तावच्चा विषयोऽनुभवोऽस्ति हि॥ 1

ऋषयः —

सुषुप्तौ सर्वविज्ञानविच्छेदो लोकसंमतः।
तत्कथं तदविच्छेदं भाषते परमेश्वर॥ 2

सुषुप्त नेति चेन्नैवं सुप्तिरत्रापि वेद्यते।
अन्यथापि सुषुप्तिस्तु केन मानेन मीयते॥ 3

तथा सुप्तोत्थितो ब्रूते सुखमस्वाप्स मित्यहम्।
ज .

सुषुप्तौ स्वापसंस्कारः प्रागेवासीत्समर्पितः॥ 4

स पश्चात्संप्रबुद्धस्य संस्मृतिं जनयिष्यते।

ईश्वरः —

नैवाननुभवे तावत्संस्कारः सूक्ष्मबुद्धयः॥ 5

न च प्रागजन्मनो तु .: सुप्तिः केनापि शक्यते।
जातायां तु पुनस्तस्यां कथं ज्ञास्यत्ययं पुमान्॥ 6

2.B. तस्मात्सुप्तिसंस्मृत्या ज्ञायते तत्र वेदनाम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तेन नित्यत्वमस्यास्ति ज्ञानस्यैवावध्यार्यताम् ॥ 7

ऋषयः —

ज्ञानस्य नियतिः शंभोः कथंचिन्नोपपद्यन्ते ।
विषयोल्लेखरूपं हि ज्ञानं वा निटश क्वचित् ॥ 8
एकार्थोल्लेखरूपं यत्कुतोऽस्य परवेदनम् ।
अर्थेषु यजनोपायवृतेषु विविध्येष्वपि ॥ 9
एकमेव कथं ज्ञानं क्रमं संप्रवर्तते ।
अतितानागतज्ञानां परोक्षमिति चेष्यते ॥ 10
परोक्षं चेत्पुरो वस्तु कथं नाम प्रकाशयेत् ।
स्मृतेरप्यनपेक्षा स्यादनुभूतेरनाशतः ॥ 11
सर्वज्ञत्वं च जन्तूनामेवं स्यादुपपादितम् ।
नानया सिद्धिवश्चैतं न सन्देहो न विभ्रमः ॥ 12
अस्यार्थं प्रति संभेदाद्भिदा संभाष्यते सदा ।
सुदृशामेव भूतत्वादर्थानामर्थमण्डले ॥ 13
अनुमानप्रमाप्रेक्षानैसंनित्यसंविदः ।
सर्वमाणविविच्छेदः सदेवमुपपादितः ॥ 14

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भावाभावौ पदार्थानामपि प्रत्यक्षाच्चिद्भवेत् ।

नाविवादोऽथ तज्ज्ञानं सर्वार्थविषयं स्थिरम् ॥ 15

तत्कथं नित्यविज्ञानमणूनामुपपद्यते ।

ईश्वरः —

· त्प्र ज्ञान क्रिया नित्या चेतनाना मुनीश्वराः ॥ 16

यथा भोक्तरि नित्येऽपि भोग्यानां नित्यता नहि ।

तथा ज्ञानस्य नित्यत्वे ज्ञेयानां नित्यता न हि ॥ 17

ज्ञानं न विषयाकारं (त)था चेदेष विप्लवः ।

भवद्भिरुक्तः सर्वोऽपि संगच्छेत मुनीश्वराः ॥ 18

एक एव यथा दीपो नीयमानो यथा प . . ।

तत्तदर्थप्रकाशाय प्रकाशाध्यापकल्पते ॥ 19

एवं ज्ञातृस्वभावोऽयं ज्ञानाति विषयागमे ।

तदभावे च तद्भावं नैव मुञ्चति दीपवत् ॥ 20

ऋषयः —

ज्ञानक्रियेति या प्रोक्ता सा कथं वर्तते पशौ ।

कदा स्या विषयाभावकदा विषयसंभवः ॥ 21

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ईश्वरः —

कर्तृत्वं सहजो भावश्चेतनाना मुनीश्वराः ।
मलेन तद्यदा रुद्धं त · · नर्विषयं भवेत् ॥ 22
यदा तु कलया लोकमवसार्येति वैमलः ।
तदा भवति कर्तृत्वं पशोर्वै वृत्तिलब्धकम् ॥ 23
वृत्तिलब्धं हि कर्तृत्वविविध्येषु प्रसर्पति ।
ज्ञेयं प्रेर्यमिति द्वैतमर्थानामिह संमतम् ॥ 24
जिज्ञासया प्रवृत्तोऽसौ ज्ञेयार्थेषु प्रवर्तते ।
चिकीर्षया क्रियार्हेषु करणानीकसंयुतः ॥ 25
ज्ञानस्य विषयीकारो नित्यसिद्धस्य वस्तुनः ।
ज्ञानक्रियेति सा ज्ञेया शास्त्रेऽस्मिन् शिवभाषिते ॥ 26
विषयीकरिणः पुंसो विषयाणाँ बहूनि वै ।
अपेक्षितानि विप्रेन्द्रा यः सर्वमधिगच्छति ॥ 27
यथा चा(व) · णमास्थाय यं यमर्थं निरीक्षते ।
तत्र तत्रास्य तद्व्यापि विशुद्धमवलोक्यताम् ॥ 28

ऋषयः —

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कथं विषयमीक्षन्ते कथं तान्यधितिष्ठति ।
कथं च तस्य तद्रूपे ईक्षते विस्तराद्वद ॥ 29

ईश्वरः —

त्रिस्रस्तावदवस्थासु रणोरस्य मुनीश्वराः ।
तत्र जागरितैः सर्वकारणानामपेक्ष . न ॥ 30
यदकलो वृत्तिलब्धवर्ति निःसार यत्यणोः ।
तज्जागरित मित्युक्तं सुप्तिस्तद्विपरीतताम् ॥ 31
यावत्तु क्वापि निद्राति तावज्जागरितं मतम् ।

ऋषयः —

निरिन्द्रियप्रदेशे तु मनसो वर्तनं यदा । 32
सा निद्रा नैन्द्रियस्थाने वृत्तिजागरिते विदुः ॥
अथैकावपि किं ब्रूषे अपसार्यापसारकौ । 33
निद्राजागरिते वस्तुं प्रसिद्धमभिलक्ष्यते ॥

ईश्वरः —

अप्रवृत्तिभ्यां निद्राजागरिते मते । 34
भवद्भिरपि कस्यापि वस्तुनो मुनिसत्तमाः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

नाममात्रेऽपि वादोऽत्र बाध्यं रूपे तु कश्चन । 35
निवार्य यस्तु वा वोचे प्यत्रास्तु प्रविचारणा ॥

निन्दादावप्रतिस्प · ·णुमा ब्रूष्वति द्विजाः । 36
गृह्यते बहवः सन्ति वृत्तारा: साध्यतेऽत्र च ॥

निरज्ञानो यदा जीवो विभुर्व्यासङ्गदृक्तया । 37
तर्हि देहाद्बहिस्स्वस्य न कस्माज्ज्ञानसंभवः ॥

ज्ञानस्य नित्यावात्वे किं करणानामपेक्षणम् । 38
न हीशे कारणानीकान् प्रार्थते सर्वदृग्दिशि ॥

ऋषयः —

मा भूतस्य लतो हेतो विज्ञानं सर्वतः सुखम् । 39
किरणव्यूहसंपत्तौ जानात्येव न चान्यथा ॥

ईश्वरः —

यथात्ममनसोर्योगो ज्ञानोत्पत्तौ निबन्धनम् । 40
निरिन्द्रियप्रदेशेऽपि तेन सोऽस्त्येव सुव्रताः ॥

तत्किं न जानते ज्ञानं कारणे सत्यपि द्विजाः । 41
सेन्द्रियेण प्रदेशेन यदि योगोऽस्य वाञ्छितः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तस्मिन् कोऽतिशयो योगे पूर्वस्यादीनि चिन्त्यताम्। 42
अहंप्रत्ययनिष्पत्तौ बाह्याक्षं नोपयुज्यते॥

यत्सत्तामात्रता कोऽपि विशेषो न विभाव्यते। 43
कश्च योगविशेषो यो भवद्भिः कथ्यतेऽद्य वै॥

सर्ववृत्तिषु विच्छेद इति सम्यग्विभाव्यताम्। 44
न विशेषमनाश्रित्य भवतां गतिरस्ति वै॥

हित्वा विशेषं निर्हेतुं सहेतुरयमिष्यताम्। 45
तस्मादावरणापाये ज्ञेयं जागरितं मतम्॥

एवमुद्भिन्नचैतन्यो युज्येतार्थबुभुत्सया। 46
जिज्ञासया प्रयुक्तेषु यदाक्षाणि बहिस्तदा॥

विषयैः सह युज्यन्ते यदा योग्यवशानि वै। 47
आदावालोचना संविद्वस्तुमात्रावगाहिनी॥

भवेत्तदा कृतार्थस्व मन्यते तावता पशुः। 48
तया प्रसूयते पश्चाद्विज्ञानं सविकल्पकम्॥

जात्यक्षरो समायुक्तो पुरोवर्तिनि वस्तुनि। 49
तदा कृतार्थमात्मानं मन्यते ज्ञानसाधनात्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

इष्टानिष्टपरिज्ञाने यतो स्यात्तेन संभ्रमः। 50
मन्यते यः कृतार्थस्त्वं स एवात्मेति चिन्त्यताम्॥

सादृश्यमात्रसंदृश्यो विशेषानवमर्शनात्। 51
यच्चात्राप्रतितिष्ठः सन् यः क्लिन्नाति स एव सः॥

विशेषणं विशेष्यंच तथाङ्गं लौकिकं स्थितम्। 52
गृहीत्वा संकल्पैर्ये तद्यः प्रत्येति स एव सः॥

विशेषणं विशेष्यंच तद्योगं लौकिकं स्थितम्। 53
स्फुटापह्रापह्रंपन्नेदं तदिति मन्यते॥

भूमानिसन्धता बुद्धिं तत्र निगद्यते॥ 54

यथार्थभोजितो भाजि तथाक्षाण्यभिनन्दति।
तदात्मानं विजानित बुद्धिवृत्त्युपदर्शनम्॥ 55

इति कामिके विद्यापादे

चतुर्थः पटलः

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(पञ्चमः पटलः)

किमात्मा दोषः किं बुद्धे करणानामयं भ्रमः।

आहोसिदभिलष्यो वा संवति नः प्रभो ॥ 1

ईश्वरः —

बाह्याक्षाणि च विद्यायां न कदाचिद्धि पर्ययः।

..न्ति स्वभावो यमेषामिति विजानय ॥ 2

ऋषयः —

अभाव चक्रबुद्धिर्वा मृगतृष्णा यिकोऽपि वा।

अव्यावृत्तदृशां पुंसां न भवन्ति कदाचन ॥ 3

सत्पात्रि भावनामेषां कथमीशापभाषसे।

ईश्वरः —

वासानायमर्थतो बोधे विपरीतो मुनीश्वराः ॥ 4

लिङ्गाभासकृतः किं तु अक्षमुढेष्वियं मतिः।

3-A ऋषयः —

आरोप्य धर्मसदृशे पुरोवर्तिनि भासते ॥ 5

हृलक्ष्यबुद्धिं कुर्वाणो बाष्पे धूमधियं यथा।

आरोप्य धर्मी मन्येत गिरौ धूमधियं यथा ॥ 6

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आरोप्य धर्मी मन्येत गिरौ धूमध्वजं यथा ।
शुक्तौ शौक्ल्यं सदालोक्य रजतत्वममन्यत ॥ 7

रजतत्वसमायोगादिदं रजतमित्यपि ।
शौ दृशा परिज्ञाते विशेषानवभावभासना . ॥ 8

रजतत्वमिदन्ननमिति पूर्वं हि मन्यते ।
अदृश्यन्चलदुद्वर्णाः शौक्ल्यमात्रावलोकने ॥ 9

इदं रजतमित्येवं न विपर्ययाग्रहः ।
तस्मात्स्मरणपूर्वत्वादस्मत्त यतदुद्भवेत् ॥ 10

लिङ्गा । से भवो मोहः न परोक्षोऽथमिष्यते ।
अनृतं मनसा ध्यायेदनृतं वचसा वदेत् ॥ 11

चक्षुषा सत्यमेवार्थं ध्रुवं पश्येदयं पु . ।
बुद्धेरयं ततो दोष . . रथार्थनिश्चयात् ॥ 12

वस्तुजिज्ञासनायोगात्प्रत्यर्थविनिदु . . ।
संखे च वीति मज्ज्ञानं निशंखविमतीति च ॥ 13

मुखे विलोक्यमाने तु दक्षिणे प्राङ्मुखत्वया ।
जनिकादृक्ते प . . रक्तमतिस्तथा ॥ 14

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जलदेषु प्रसर्पत्सु शशाङ्कसंसर्पणभ्रमः।
तीरादिभ्रमणे बुद्धिः रूढस्य शाश्वता॥ 15
. . . . हुताशने।
भ्रान्तश्च विविधानर्थान् न्यास्यामिति प्रभा . ते॥ 16
कामुकश्चक्षुषा नित्यं कामिनी . . मिह ते।
चक्षुषेव विभाव्यन्ते गन्धर्वनगरादयः॥ 17
मन्त्रिणा सुप्रयुक्तानि शक्रजालानि पश्यति।
ईदृशान्येव ज्ञानानि दृश्यन्ते चाक्षुष . वै॥ 18
कुतो विपर्ययज्ञानजनकत्वं समीरितम्।
ईश्वरः —
साधुप्रश्ने महाप्राज्ञा भवद्भिः परिचोदितम्॥ 19
निरस्तप्रायमप्येवं भूयोऽपि कथयामि व।
पीतः शंख इति ज्ञानं वक्तव्यं च मुनीश्वराः॥ 20
संपृक्तं शङ्ख . . . लं वीति . . म्ना पित्तवर्तिना।
पित्तानुरञ्जिते नैतत्संपृक्तं चक्षु . . .॥ 21
नैव ग्रह्यते सम्यक् . तिम्ना तद्विशेषितम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अथ तद्धर्मता भित्वा . तिम्नात्र मुनीश्वराः। 22
शौक्ल्यं रक्तमतद्धर्म सादृश्यात्सत्वयोघधीः ॥
द्रव्येषु रूपमात्रस्य दर्शनं समवायतः। 23
दृष्टं सर्वेषु पिण्डेषु तथात्रापीति . . . गिकी ॥
समीप्येति विजानाति यदा पित्ते स्वलोकने । 24
तया तत्पीतिता मात्रग्रहणं वस्तु न त्यजेत् ॥
शङ्खं न सन्निकृष्टस्य सरूयमप्यच्छभासि तत्। 25
किं बन्धानेतदा पश्यज्ज्ञानयो . म भाविनोः ॥
सामान्याधिकरण्येन पश्चाद्बुध्यावसीयते । 26
रूपमात्रं विना द्रव्यं दृष्ट्वा रज्ञापि लक्ष्य . ॥
द्रव्यं तद्रूपरहितदेतं द्वयमीक्ष्यते । 27
अविलम्बेन तेनात्र ममन्यते धर्मताम् ॥
तदत्र शङ्खधीः सा च . तिमज्ञानमेव च। 28
चाक्षुषत्वादबाध्यत्वाल्लिङ्गाभासाद्विशिष्टधीः ॥
बाध्यते जायमानेयं मतङ्गाभासवतो द्विजाः। 29
ज्ञानाकारा शुभावित्वादन्तरा नात्र दर्शनम् ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तावन्मात्रा कृतास्यत्र बालाना . . षत्वधीः । 30
तर्हि कल्पयितुं शक्तं न योर्हितवक्तिनोः ॥

इष्टतां शङ्कपीतिम्नोर्विलोचनमचेतन . । 31
यथावस्थितरूपस्य भासकं वस्तु न स्वतः ॥

अन्यथा दूरयोर्ह्येवं शिष्टयोऽपि दूरतम् । 32
कल्पयेदविशेषेण दुष्टभावात्तथेति चेत ॥

अनिन्द्रियत्वान्ध्यदोषाणां तेभ्यो नो जायते मतिः । 33
अप्रदोष . . संश्लेषं मन्यते नयोः ॥

सर्वभूमेषु नयन . . यज्ज्ञानं स आप्नोति निबोधितः । 34
चक्षुर्व्यापारयामास यद्यद्वस्तु प्रतीयते ॥

तत्तदस्तीति युक्त . . . स्थितम् । 35
अन्तरालमजानीताः पितरा शंकरस्तव ॥

अभावमस्य मन्येत पूर्वप्रत्ययपाद्रवान् । 36
शौक्ल्यं च शङ्खे . . न्नापसायकम् ॥

किं त्वेतदेवमाभासाद्व्यापारोऽस्य निवर्तते । 37
कार्त्स्न्याद्धीर्वासनादार्ढ्याद्बुद्धौ प्रवर्तते ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE.

अनुव्यवसिता सैषा व्यवसायानुगामिनी । 38
निर्विकल्पकविज्ञानं तेनैवोदित ध्रुवम् ॥
अतोऽभिस्मरणं तत्र जायते सविक . . . । 39
. . र्णा वस्तुविषया मुदितां ज्ञप्तिसंहतिम् ।
अन्वितां यो विजानाति क्वचिदेवंविधौ द्विजाः । 40
बहिः प्रसारिते नेत्रे संनिकृष्टे च वस्तुनः ॥
तदतिष्ठाय तद्वृत्ति नान्यथेति विनिश्चितम् । 41
असता तत्कथं चक्षुः संनिकृष्टे तु वस्तुनः ॥
असन्निर्षा तत्तेन न जानाति निश्चयः । 42
न चेह संनिकर्षोऽस्ति नियतं कम्बुपित्तयोः ॥
तत्त . . न्निकृष्टार्थं नायं शक्नोति रीक्षितुम् । 43
त्र . त्र मायामोहस्तु व्याख्यातोऽनेन सुव्रताः ॥
वायुपित्तादिनुन्नस्य यतो भ्रमति मूढधीः । 44
पश्चाद्यत्र क्रियामात्रं गृह्णन्नेह न हीद . . ॥
. व शिष्यमनयोर्वत्ति रवचितात्स्व द्वयोरिव । 45
प्राङ्मुखे दर्पणे पश्ये यदा प्रत्यङ्मुखो मुखम् ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तदा प्राङ्मुखमात्मानं प . . . . प्यते । 46

अत्रावध्यार्यतां युक्तिः कथ्यमानमपद्विजाः ॥

नायनावृत्तयो प्राज्ञा स्वच्छमादर्शमण्डलम् । 47

संबध्यन्ते परावृत्य स्वकीयेन मुखेन वै ॥

मुखे प्रका . न्यतां दर्पणनक्रमेण तु । 48

दृश्यमानं प्राङ्मुखत्वं पुरोवर्तिनि दर्पणे ॥

मुखे यास्यति तत्त्रत्र प्राङ्मुखोप . . लु । 49

यदा दर्पणमेवासौ पश्येन्नारोपणं तदा ॥

यथा मसौषभ्मे न तदा दर्पणं पुनः । 50

तदा जिज्ञासितायोगात्तदा स तदर्शनम् ॥

संयुज्य दर्पणेनैबा मुख . ता न मुनेरिति । 51

तद्धर्ममात्र दिग्नोभ्मो वीक्ष्या प्रतिपादयेत् ॥

समनन्तरमेव स्यात्ततः साधर्म्य धर्मधीः । 52

अग्रं हि च . . नित्यं नाशं नापरांशकः ॥

अग्रेनास्ये गृह्यमाणे का वार्ता परवेदने । 53

स्मरदर्पणदिग्भेदं संसृज्याभ्योन पश्यति ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आशुभावादलक्ष्योऽयं धीकृतः प्र . . जैनैः । 54
एवं विधेषु न्यायेषु यः कौतुकमुपाश्नुते ॥
मुहुर्द्दिदृक्षवेत्येवं समाकतानेन्द्रियादिकम् । 55
पटो . . मतिः सत्या संबन्धोऽस्ति यतो ध्रुवम् ॥
पटे रागेण संयुक्ता महारजनितात्र हि । 56
चन्द्रेऽध्यस्यति बुद्ध्यैवं मेघसंसर्पणक्रिया ॥
अन्तरा नाग्रहा द्वौद्ध . . . न्द्रमसौ द्विजाः । 57
व्यवधानं तु दृश्येत दृश्ययोर्द्रव्यकर्मणोः ॥
यत्र यत्रावयोः सिद्धा हीयतां धर्मधर्मि . . । 58
3-8 तथात्रापि च बुद्धिः स्यादन्तरालानतेक्षणात् ॥
एकेना . ारूढस्य तिरभ्रमणधीरपि । 59
व्याख्याता देहसंभ्रान्तिस्तरस्यापादयेद्यत . ॥
. . . खन्दिशो पश्यन्तीरजानां महीरुहाम् । 60
नैव गच्छति तं शीघ्रं स्मरन्नात्मापसर्पिणम् ॥
आरोप्ये च्चिरताज्ञात . . तीरेषु पश्यति । 61
गन्धर्वनगराज्ज्ञानात्सत्यमेव द्विजोत्तमाः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दृशा दृष्टपथा केन पश्यायद्भुक्तिमीदृशाम्। 62
मन्त्रशक्त्या निसृज्यन्ते शक्रजालादयो द्विजाः॥
ल - - . यत्सूक्ष्मं दूरे गिरिनगादिकम्। 63
यावत्प्रमाणे शैलादिदेशे लग्न्य यदेक्षणम्॥
तदा महत्वं नो भाति गिरिम . . . गृह्यते। 64
तदा विशिष्टविज्ञानं पूर्ववत्परिभाव्यताम्॥
यद्दिगन्तर सन्धाने विद्यमाने यदा पुनः। 65
जातेन दिग्भवे शब्दे तदा तद्दिश्यतात्र तु॥
न हि श्रोत्रेण दिग्भेदस्तदायमवगाहितः। 66
शब्दोपाधिं विना श्रोत्रं दिगवच्छेदकं न हि॥
अवच्छिद्यादिदं यं वै न स शब्दोऽन्य . . । 67
शब्दमात्रं दिशां चान्यां प्रतिसन्धाय चेतसा॥
विशिष्टरूपं व्यामोहं जनयत्येष चेतनः। 68
सीमास्योदरं न्यस्ता जिह्वायावित्ततीत्तता॥
गृह्णन्तित्त्वं विजानाति प्र . सन्धान सक्तयाः। 69
न च जिह्वा सिताज्ञाने प्रभवेत्व . नोरसे॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

उभयप्रतिसन्धानभ्रमोऽयं जीवसंज्ञकः। 70
सुरभिः प . . वारिदहनो दाह्यगन्धवान्॥
भ्रश्यायते भये चेति भ्रमो बुद्ध्यैव कल्प . ते। 71
अप्रत्यक्षार्थविज्ञानं परोक्षं परिभाष्यते॥
प्रत्यक्षार्थपरिज्ञानमप . त्यक्षं च सुव्रताः। 72
समोऽयं तत्परोक्षात्मा यतो भेन्द्रियसंभवः॥
इन्द्रियार्थभ्रमो वापि अस्य स्यादविशेषतः। 73
यादृगेव प . . र्थस्तादृशाज्ञस्य गोचरः॥
तस्मादसौ न गृह्येत तेन रूपेण बाह्यकैः। 74
यादृग्विज्ञाननिष्पत्तौ यादृगाकारमिष्यते॥
तादृगेवाभवत्तत्र समर्थन्नेतरक्वचित्। 75
उष्णं जलमिति ज्ञानं यथार्थं न तु विभ्रमः॥
यस्य भ्रमोऽयं तन्नापि संनिधौ ध्येष्यते स्फुटम्। 76
सदसद्रूपविषयं स . पैकप्रकाशकम्॥
क्रमतेनैन्द्रियं विप्राः किं तु तस्मान्निवर्तते। 77
भविष्यन्तमतीतं च गृह्णीयाद्यदि तद्ध्रुवम्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

धर्माधर्मरहितं योगी द्रव्यं पश्येदपि क्षणम् । 78
· द्रूपेनजातानि प्रत्युतास्मान् निवर्तते ॥

आन्ध्यमेव हि भावानां योग्यतादर्शनं दृशः । 79
तस्मादसन्तं भूतं च भविष्यन्तं च सुव्रताः ॥

· · विशेष्य तेनाल्पं गृहीतं दृक् स्वयं विना । 80
इत्थं विचारदूरा हि भ्रमस्य परिचिन्तने ॥

अनिवर्त्य · चक्षुर्ज्ञप्तिर्वा दोषवर्तिनी । 81
प्रवृत्तिः कुरुते दोषैरिन्द्रियाणां मुनी · · ॥

तेनाल्पशः प्रवृत्तानि भासमत्यल्पमेव तत् । 82
ममापि चित्तनिर्दोषैः क्रियते ज्ञप्तितो पराः ॥

ज्ञप्तिभिः सर्वभा · · स्वभावदेव सुव्रताः । 83
मध्येनजायते नापि निवर्तेति निश्चितम् ॥

इति श्रीमत्कामिकाख्ये महातन्त्रे

विद्यापादे

पञ्चमः पटलः ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(षष्ठः पटलः)

ऋषयः —

मन्त्रौषधिबलाद्बीजेष्वन्यथाङ्कुरवर्तनम् ।

दृश्यते तत्कथं शाक्तमध्ये नाथीं सते प्रभो ॥ 1

ईश्वरः —

शक्तयः सर्वभावाना मचिन्त्याज्ञानगोचराः ।

स्वभावादेव संसिद्धा व्यज्यन्ते सहकारिभिः ॥ 2

यथा बीजाङ्कुरोत्पत्तिर्न शिलाशकले तथा ।

मन्त्रौषधिशतेनापि सुप्रयुक्तेन साध्यते ॥ 3

बीजेषु तादृशी शक्तिरस्ति स्वभाविकी द्विजाः ।

सामग्रीमुचितां प्राप्य या स्वकार्ये प्रगल्भते ॥ 4

ऋषयः —

नन्वेवमिन्द्रियेऽपि स्यात्सामग्री दो . .ज्जिताः ।

निष्पादयति विज्ञानं ममयाभं भ्रमसंज्ञितम् ॥ 5

नैतत्सत्यमदोषेऽस्मिन् सन्मात्रमवगाह्यते ।

यथार्थं चक्षुषा विप्रा विशेषानवभासनात् ॥ 6

विशेषानवभासोऽयं चक्षुषो दोषकल्पितः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ततोऽस्ति तत्र दोषोऽसौ सति तस्मिन् कथं सुधाः । 7
न मोहजनको दोषस्तेनेति परिभा - . ॥

तस्मात्प्रवृत्तिरक्षाणां दूषणाद्दोषमीरिता । 8
तस्मात्प्रत्यक्षविज्ञानकरणानां मुनीश्वराः ॥

यथार्थज्ञानिष्पत्त्या सर्वाज्ञप्तिर्न चान्यथा । 9
एतेनाक्षस्य सिद्धस्य जगतः सत्यतोदिता ॥

नाक्षजभ्रमदृष्टं वा वृत्तं ज्ञाकमतोऽन्यथा । 10

ऋषयः —

ननु स्वप्नार्थदृष्टान्ताज्जगतेऽलीकतेष्यते ॥
जगदेतद्भवेन्मिथ्या दृश्यत्वात्स्व-दृश्यवत् । 11

ईश्वरः —

अप्रमाणाय नानात्वान्मिथ्या वै स्वप्नदर्शिताः ॥
न हि जाग्रदवस्थायां गृह्यते मानतो जगत् । 12
मिथ्यात्वं केतमानेन दृश्यताव्याप्तिमीहताम् ॥
यत्प्रतीतिबलाद्येन परस्मै प्रतिपद्यते । 13
ततारतस्वप्नबोधे तत्त्वसारात्मबोधकः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

बोधनाज्जाग्रताद्धेण व्याप्तिश्चेद - - दर्शिता । 14

व्याप्तौ चेन्मानताध्यक्षे कथमर्थेषु नेष्यते ॥

तच्चेत्प्रमाणमिष्टं स्यात्तदेव व्याप्तिबोधकम् । 15

मिथ्य दृश्यत्वयोर्यस्मादपि दृश्यं समर्थ्यते ॥

जगत्सत्वस्य सिद्धोऽस्य मिथ्यात्वं स्वप्नसंविदः । 16

मिथ्यात्वे जगत स्वप्नो भवेत्साध्यविवर्जितः ॥

स्वप्ने दृष्टान्ततासिद्धौ जगते . का भवेत् । 17

जगतः सत् ता सिद्धौ स्वप्ने दृष्टान्तता मता ॥

साध्यसाधकतद्भावप्रमाणपरिबाधनात् । 18

दृष्टान्ते साध्यवैधुर्यं स्वत एवोपपद्यते ॥

स्वसाध्यविपरीतार्थसाधकव्यभिचारिणी । 19

यस्य दृष्टान्तता तस्य दृष्टान्तत्वं न युज्यते ॥

साध्याविरुद्धधर्मित्वे दृष्टंतत्वं हि वस्तुनः । 20

नान्यथो यच्चनामा . सो मानमिदं द्विजाः ॥

तदेव जगतः सिद्धा सत्यता शंसितव्रताः । 21

यथा सर्वप्रमाणानां मानात्वं परिपालयते ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ऋषयः —

भ्रमो हेतुस्वभावोऽसौ बाह्याक्षाणां त्वयोदितः। २२

प्रज्ञा तेभ्यो बहिर्यातीत्येतदुक्तं महेश्वर॥

अस्य प्रकारं विज्ञातुमस्त कौतुहलं हि नः। २३

ईश्वरः —

... सन्हितो जन्तुः संकल्प्य ज्ञेयमात्म (तत्)॥

उत्कर्णितः (कण्ठि) कर्तृशक्त्या निजयात्प्रेरये द्बहिः। २४

चक्षुस्तत्तु यथाशक्ति विषयानधितिष्ठति॥

कलया तु ततो दृत्तः शक्त्या निःसार्यते तमः। २५

तस्मिन् निःसारिते जन्तौ जृम्भते निजवेदना॥

4-A तदा चक्षुर्मनो जीव इत्याभिरस निगद्यते। २६

यावच्चक्षुर्मलोत्सारः तावन्नात्मावभासते॥

तदा रूपादिविषयान् स्वात्मलोभमदोत्कटः। २७

निजापरोक्षचिच्छक्ते विषये गुरुते पशुः॥

निश्चितेति तदा भावान्न सन्देहमुपैति च। २८

प्रत्येति वक्तुराप्तत्वं तज्ज्ञानस्या विपर्यये॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पूर्ववासितविज्ञानग्रन्थिश्चाविच्छिनत्यलम्। 29
एतदेव हि कांक्षन्ते प्राणिनः सर्ववस्तुनः॥

विचिकित्सा प्रवर्तेत अतऊर्ध्वं कथंचन। 30
एतस्य प्रतिरूपत्वे दिवैशास्त्रदूरितम्॥

साक्षात्कारेण हि ․․ फलस्य सकलैर्जनैः। 31
विमुक्तविषयं सम्यग् लोकयात्रा प्रवर्तते॥

एषा निष्ठा परा काष्ठा विवेकस्य मुनीश्वराः। 32
नातो विवेकप्रसरादूर्ध्वं कश्चित्प्रवर्तते॥

अस्यैव स्वस्वरूपत्वात्प्रत्ययोऽत्रैव बाधते। 33
सर्वस्या विद्यते सर्वं सर्वैस ․ स्वयं द्विजाः॥

अत्रा․ प्रत्ययं चेत्सा स्यादेवात्मैव वैचितः। 34
एतादृगात्मबोधस्य विषयः करणेच्छया॥

सुखस्यामुत्रजं नून ․प्यते हिमत्तपः। 35
यत्नेन महता लोभादार्जितं बहलं धनम्॥

परस्मै दीयते काले विनयाच्छीलशालिना। 36
त्यक्तसत्मनि वासोऽद्य सुखैश्चमैकतत्परैः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तीर्थानि बहुलक्लेशैः प्रवदन्ते विवेकिभिः। 37
एतद्रूपोऽवबोध्यो हि दुःखं तु निरये द्विजाः॥
हिताहितपरिप्राप्तौ निष्ठा ऽ-षा परा मता। 38
इदमेव मानेषु प्रत्यक्षत्वं न चेतरत्॥
उक्तश्चक्षुर्भवो बोधो सौत्राणां शृणु संसदम्। 39
तीव्रेण रक्षकस्याशु वृत्तयश्च गुणस्य तु॥
निर्गत्य सन्निधे दूरे शब्दं गृह्णन्ति वर्तितम्। 40
नमस्कारे श्रुतेवत्तु सर्वदिक्षु विजृम्भते॥
प्रवर्तितेऽस्य दीपस्य प्रभवे मुनिसत्तमाः। 41
येनान्तश्च बहिश्चापि शब्देनैषोऽधिगच्छति॥
क्रमेणोच्चारितान् वर्णान् श्रुत्वायं भावनाबलात्। 42
पदवाक्यविभागेन प्रत्येर्थाननेकधा॥
शब्दे तदर्थे संवित्त्या तथानुकरणक्रिया। 43
जानाति वक्तुराकृतमर्थांश्च विषयानपि॥
कालेन यावता सिद्धा देवमात्मा विनिश्चयः। 44
तावच्छब्दो निवर्तेत तन्नायं शब्दभाविनः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तस्मात्प्रत्येतु वार्यं व्यापारो नापरस्य तु। 45
वृत्तिस्तु रसनादीनामेवं नो दूरगामिनी॥
अन्तस्थितेषु द्रव्येषु व्यापारो मधुरादिषु। 46

इति कामिकाख्ये महातन्त्रे
विद्यापादे
षष्ठः पटलः॥

श्री

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(सप्तमः पटलः)

ऋषयः —

यथा बहिस्तथा चान्तः कलावरणवारिका ।

कस्मात् स्फुटं विभासेन सं(?)विद पस्य यथा न हि ॥ 1

ईश्वरः —

बहिरावरणं नास्ति धात्वादौरान्तरे यथा ।

ततोऽवभाससौष्ठोऽयं निस्प्रत्यूहः प्रवर्तते ॥ 2

अन्तश्चा तु सा कीर्णो ग्रहे यवनिकाचिते ।

नोद्दीपयेदलं दीपः तथान्तश्च कला द्विजाः ॥ 3

शरीरेऽस्मिन्नसौ लीन विविक्तो न प्रतीयते ।

कलुषस्याम्बुनो रूपे पशुभिर्विशदं तथा ॥ 4

यथा कतकबीजस्य संपर्काल्लक्ष्यते जलम् ।

तथा विचाराच्छब्दाच्च स्वन्दते गृह्यते पशोः ॥ 5

अहंम अहम् ग्रहे य ·श्च स्वात्मानमतितेजसाम् ।

न पश्यत्यञ्जसा सन्तु शबलं वर्ष्मणानि तु ॥ 6

ब्राह्मणः क्षत्रियो वैश्यः शूद्रः पीन कृशोरुणः ।

स्वल्पावरुध्येजारश्च विशेषैरवमानिभिः ॥ 7

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विशिष्टं कलहस्थस्य निजं रूपं न पश्यति ।
नैसर्गिकमिदं ज्ञानं सर्वेषामपि देहिनाम् ॥ 8
ततो · ा दि संयुक्तं प्रवृत्तिर्बहु मन्यते ।
या वैषयकमानन्दं प्रसूतेऽथाय धार्मिकम् ॥ 9
व्य·धित्वा दुःखमिश्रत्वात् नोपादेयो विवेकिना ।
निजानन्दसहस्रां . . . . ॥ 10
तस्मादसौ विवेक्तव्य शरीराद्रजसोऽम्बुवत् ।
सति भेदपरिज्ञाने नासौ रज्यति पूर्ववत् ॥ 11
विवेकश्चानुमानेन तर्केणागमतोऽपि वा ।
कर्तव्यो मुनयस्तस्य नान्यथा सिद्धिरस्ति हि ॥ 12
दृक्रियारूपचैतन्यरहितो यन्निसर्गतः ।
पञ्चकञ्चुकसंवीतिरपि कर्मवशात्स्मृता ॥ 13
निसर्गोऽपि च चैतन्ये सर्वतः सार्वकालिके ।
अनादिमलसञ्छन्नो न जानाति स्वयं प्रभुः ॥ 14
तस्मात्परोक्षविज्ञानं स्वस्वरूपावभासकम् ।
निष्पाद्यते शब्दकला संसृतीश्चानिवर्तका ॥ 15

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तस्मादसौ परिज्ञेयः शंभुना शुभमिच्छता ।
प्रत्ययोऽपि शरीरेऽस्मिन् दुर्लभो मुनय स्वयम् ॥ 16
इच्छाप्रयत्नप्रमुखैः कथंचित्परिभाव्यते ।
विवेक्तिः सुभगां दृष्टिं यः प्रयच्छति पुद्गलः ॥ 17
तेनैव ज्ञायते सम्यक् नाभ्यासेन कथंचन ।
यदा धर्मपरिपाकाच्छक्तिसद्भावभेदिनी ॥ 18
अणौ . . ति जिज्ञासा यस्मिंस्तस्मिन् प्रवर्तते ।
तदा सूक्ष्मोऽक्षिकायोगो नाल . न्नवमं तदा ॥ 19
उक्तमर्थं न जानाति मेधया धारयत्यपि ।
सूक्ष्माण्यपि च वस्तूनि स्वयं जिज्ञासते ध्रुवम् ॥ 20
निभं कथयति बुद्ध्या च गुरुश्च परिपृच्छति ।

ऋषयः —

व्यापकं यदि चैतन्यं नित्यं स्वभाविकं पशोः । 21
मलेनाच्छाद्यते कस्मात्कथं कोऽयं मलोऽपि च ॥

ईश्वरः —

शरीरे वर्तमानस्य विषयात्परिपश्यतः । 22

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पुद्गलस्याप्रमत्तस्य सावधानस्य वस्तुषु।
क्रमेण नयति द्रव्यं भुक्तमुन्मादकं यथा॥ 23
किञ्चित् ·ब्धत्वमाधत्ते किंचिन्निश्चेष्टनानपि।
· राइयति चात्यर्थं मूभावं करोत्यलम्॥ 24
अज्ञाते नृत्तगीतेऽपि भावे गेयेऽपि नृत्तवेत्।
दुर्बलं नलिने कुर्यान्मदोऽभ्यर्थे प्रगल्भते॥ 25
तथानादिर्मलोऽप्येष सर्वशक्तिसमन्वितः।
निरुणाध्य हि चैतन्य सर्वथोदितमप्यणोः॥ 26
यथा ज्ञानं विनाप्येवं प्रती· ता मोहकादिषु।
तथा निरोधिका शक्तिर्मलाह्यस्योऽवधार्यताम्॥ 27
विचित्रशक्तयो भावा विचित्रज्ञानगोचराः।
नानाविधस्य कार्यस्य भयजन्म च कुर्वतः॥ 28
तस्यां मूलनिरुद्धो · सहजज्ञानवानपि॥
शिववत्सर्वकर्तृत्वे सर्वज्ञत्वे च सत्यपि॥ 29
न करोति न जानाति परं मुह्यति बालवत्।
· · यं साध्यते सोऽयं गुरुणा करुणाब्धिना॥ 30

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तदास्य पुद्गलस्यैषा ज्ञानशक्तिः प्रसर्पति ।
देशकालानवच्छिन्ना निरवध्या निरर्गला ॥ 31
सविपर्या च रूपा च विषयात्मातिलङ्घिनी ।
अपि सूक्ष्मतरेष्वर्थे ष्वनन्तकप्रसर्पिणि ॥ 32
अतीतानागतार्थानां न शब्दपरिमोहिनी ।
जाना · सा हृतानर्थान् नाया ज्ञाति पुद्गलः ॥ 33
तद्विसूलक्षणमात्मानं ज्ञात्वा च परिहृष्यति ।
4-B निजानन्दमहाम्भोधौ यया मज्जेदनाकूलः ॥ 34
सा मुक्तिः स तु निर्वाणः तदेव परमं पदम् ।
मृग्यं भिः सर्वैर्योगिभिश्च द्विजोत्तमाः ॥ 35
तत्स्वरूपलाभार्थे तप्येते हि तपो महत् ।
व्रतानि दानयज्ञाश्च नियमाश्चाप्यनेकशः ॥ 36
वर्णाश्रमप्रयुक्ताश्च नित्यनैमित्तिकावपि ।
अव्यक्ताश्चालीकफलाः पर्यवस्यन्ति चात्र वै ॥ 37

ऋषयः —

कथं मलापरुद्धस्य शरीरे ज्ञानसंभवः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यथा बहिर्न जानाति तथान्तश्चापि किंचन। 38

ईश्वरः —

सन्ति मायाः प्रसूतानि करणान्यस्य देहिनः ॥

प्रादेशिकाणि भागार्थकर्मणा भवसत्मनाम्। 39

पिपासुमापसार्यैनं यथा शैवालमम्बुनि ॥

तथा प्रसारितेनैस्तु करणै भोगसिद्धये। 40

मलो यच्छादयः पुंसः करणानि च तानि यत् ॥

शरीर एव वर्तन्ते तेनात्रैव च चेत्यसौ। 41

प्रदेशकत्वादर्हस्य ज्ञानं प्रादेशिकः विदुः ॥

आध्यत्ते लौकिकानां तु तत्वमेतद्दज.. ताम्। 42

ऋषयः —

करणैरुपकार्यासौ ज्ञानशक्तिप्रबोधकैः ॥

स्वभावचैतन्यकलासमुद्भावकतर्पितः। 43

विपर्यये क्वचित्क्वापि संशिते निश्चितेऽपि च ॥

नाध्यवस्यति किंचापि न किंचापि च पश्यति। 44

तदेकमपि विज्ञानं परोक्षं त्वाप्यनीदृशम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सर्वं मेतन्महादेव विस्तरेण वद प्रभो। 45

ईश्वरः —

मायाभावात्परा शक्तिः प्रसूति सर्वकस्य हि॥

नित्या विचित्रशक्तिश्च परस्माद्व्यज्यते स्फुटम्। 46

ज्ञानक्रियासमुद्बोधसिद्धये साध्यपञ्चकम्॥

प्रसूते नियतिं कालं विद्यारागं कलामपि। 47

तथा बुद्धिमहंकारं करणं च धरादिकम्॥

ज्ञानार्थं च क्रियार्थं च वागादि जनयत्यपि। 48

एभिः समावृते जन्तुः बुध्यते च करोति च॥

कला तत्र मलं पुंसां निवारयति वारकम्। 49

कालिकामिव ताम्रेषु द्रव्यमनिवेशितम्॥

निर्वर्तितमलोऽस्मिन् कर्तृशक्तिः प्रकाशते। 50

विद्यया करणेनान्य विषयान् पश्यति॥

सुखदुःखात्मिका बुद्धिः परिणामात्मकं त्वणुः। 51

बुद्ध्या च करणैर्बाह्यै बाह्यार्थान् प्रतिपद्यते॥

ज्ञानं तत्र द्विधा प्रोक्तः वृत्तिरूपं निजं तथा। 52

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निर्विशेषं निजं शुद्धं नैवोपप्लय स्थिरम् ।
वृत्तेरमी विशेषा स्युः सुसर्गाद्याः परश्शः ॥ ५३
तथाच स्वप्नविच्छित्ति बुद्धिजा प्रतिजृम्भते ।
यथा यथा मयित्या च विचित्रार्थप्रकाशिनी ॥ ५४
निजं तन्यमेवोक्तं मनावरणवासि यत् ।

इति कामिकाख्ये महातन्त्रे
विद्यापादे
सप्तमः पटलः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(अष्टमः पटलः)

जीवाश्च त्रिविधा ज्ञेयाः सकलाः प्रलयाकलाः।
विज्ञानकेवलाश्चेति सकलस्तेषु कथ्यते॥ 1
मायया मोहितो नित्यं मलेन च्छिन्नदृक्क्रियः।
भुञ्जानो विविधं कर्म संचितं तद्वहद्बहु॥ 2
मलादित्रयसंसिद्ध पुर्यष्टकसमायतः।
बुधश्च प्राकृतैर्देहैर्भुङ्क्ते प्रकृतिजान् गुणान्॥ 3

ऋषयः—

का माया मोहनं कीदृक् भोगश्च स्यापि कीदृशः।
पुर्यष्टकेन चैत्रस्य उपयोगश्च को भवेत्॥ 4

ईश्वरः—

मायाशक्तिर्विभोर्नित्या देहिनां परमोहिका।
मोहस्तु विषयासक्तिर्यया संसृते शुभा॥ 5
विषया द्विविधा प्रोक्ता ऐहिकामुष्मिकात्मना।
स्रक्चन्दनादिरूपेण . क्षाना नामुभया मला॥ 6
इयांस्तावांस्त्रि संख्याने फलमेषां सुखं मतम्।
तनाभिहितान् धर्मान्निष्वतावश्यकारणम्॥ 7

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कर्मणो जायते सृष्टिर्जगतः पशु वारिवत्।
भुञ्जानो विविधान् भोगान् कर्मण्यप्यार्जयेत्पुनः॥ 8
तृष्णातिरेकसंवृत्तः अतृप्तो भोगकोटिभिः।
संसारचक्रे सततमेवं भ्रमति मूढधीः॥ 9
पापान्यपि च कर्माणि कुरुते रागमोहितः।
वृत्या निकानिवृत्यर्थं भुज्यमानस्य कर्मणः॥ 10
तेन दुःखमिहामुत्र विन्दते सुखमोहितः।
तद्दुःखं त्रिविधं प्रोक्तं भूतदैवात्मसंभवम्॥ 11
भुङ्क्ते पाशकर्मवशादनिच्छन्नपि दीनधीः।
भोगो न विद्यया पुंसो बुद्धिवृत्त्यनुरञ्जनम्॥ 12
सुखदुःखादि विषया वेदना भोग इष्यते।
बुद्धेर्वृत्ति विशेषा हि सुखाद्यर्था भवन्ति हि॥ 13
विषयां करणैरेता ननु भुङ्क्ते जसा पशुः।
उपकुर्वन्ति बुद्धेस्तु पराणि च पराणि वै॥ 14
प्रकाशनेन बाह्यार्थान् बुद्धौ वानव्ययन्तिश्च।
पुंसो भोगाय सा बुद्धिरर्थाकानुरञ्जिता॥ 15

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कल्पते विषयीभूता विद्ययाः करणस्य हि।
बुद्ध्या च करणेनाथ बाह्यैश्च करणैः सह॥ 16
घटादीन् करणस्पृष्टान् बाह्यार्थान् परिपश्यति।
कर्मेन्द्रियाणि चेष्टस्याच्चिकर्षा पूर्वमास्ते का॥ 17
उपयुक्तेषु सम्भोगे पुर्यष्टकमितीदृशाम्॥

इति कामिकाख्ये महातन्त्रे
विद्यापादे
अष्टमः पटलः॥

श्री

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(नवमः पटलः)

ऋषयः —

स्वप्ने पश्यति वस्तूनि सोऽपि भोगोऽथवा नवा।

कथं चालौकिकं वस्तु ग्रस्यते सुप्तसंविदा॥ 1

ईश्वरः —

चिन्ता तावन्नृणां दृष्टा सत्स्वसत्सु च वस्तुषु।

अकाण्डप्रसवा नैव करणान्यपेक्षते॥ 2

भोगो हि द्विविधः पुंस स्वप्नाभ द्वार भेदतः।

तीव्रमन्दच्छभेदोऽत्र कर्मणां स्यान्नियामिकाः॥ 3

इतिकर्तव्यता पूर्णा यातु निर्वर्त्यते क्रिया।

सातीव पूर्णा भोगाय कल्पतेऽक्षाद्यपेक्षिणी॥ 4

स भोगो जाग्रता साध्या इहामुत्र च सुस्फुटः।

अस्फुटो जलरेखा च दपरस्वप्नसंभवः॥ 5

पदहेतुः समुत्पाद्य शुभो वाप्यशुभोऽपि वा।

पुंसो निमीलिताक्षस्य चिन्तैषा प्रतिजृम्भते॥ 6

अनिष्टा वेष्टरूप वा स्वपराद्यवमर्शिनि।

इन्द्रियोपरमे सा तु जायते चेद्यदृच्छया॥ 7

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तदा स्वप्नवदारण्येया चेष्यते विद्ययाप्यणून् ।
पशुतामुपभुञ्जान सुखं दुःखं च विन्दति ॥ 8
चिन्ता दृष्टिरियं पुंसां भोगार्थबाह्यवस्तुवत् ।
कल्पमेत्यपि सैषोक्ता शास्त्रेऽस्मिन् परमेश्वरे ॥ 9
अहंकृतिप्रसूतैषा कल्पना सार्वभाविकी ।
क्षणमासाद्य कल्पाद्य कलाभेदान् विमोहते ॥ 10
मन्यते योगिना चैषा परस्मिन्नणुचेतसि ।
ददर्श विषयाश्चर्यवस्तुनो योगशक्तितः ॥ 11
भ्रमा मुख्या क्रियाभेदैः कल्पना भ्रान्तिहेतुना ।
द्रंव्येण वोपभुक्तेन धातुवैषम्यतेऽपि वा ॥ 12
5-A स्वप्ने निषिद्धरूपे तु प्रायश्चित्तं विधीयते ।
धर्माधर्मनिमित्तं च स्वप्नो जाग्रत्क्रियावधि ॥ 13

इति कामिकाख्ये महातन्त्रे
विद्यापादे
नवमः पटलः ॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(दशमः पटलः)

ऋषयः —

अणूनां व्यापकत्वेन करणानि परार्थत ।

एकस्य बुद्धिकरतो सर्वेषां न कुतो गतिः ॥ 1

ईश्वरः —

नियतिर्नाम वा तत्वं सर्वस्यापि नियामिका ।

वर्णाश्रमादिधर्माणां भुवि पार्थिववद्द्विजाः ॥ 2

येन यत्कर्मणा सिद्धं तत्तत्रैव नियच्छति ।

अन्यथैकस्य योगेन सर्वयोगित्ववर्जितः ॥ 3

कथं नहि समाविष्टो भूतः कस्यापि विग्रहः ।

स्वप्नातिथिरसितनर्यानपीति परिजिह्वया ॥ 4

ईश्वरः —

अग्निसाधारणी सृष्टिकारिका च न संवृतोः ।

यथा तटाकनद्यादिबहूनामुपकारकम् ॥ 5

अथापि भूतो नो वेत्ति जिह्वया परकीयया ।

तथापि पक्षमुपाद्य वाचि सत्येव धावतः ॥ 6

यावत्साधारणोत्सर्गस्तावत्तु नियमो मतः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तेनैष नियता सिद्धा दर्शनान्नियमस्य च। 7

कामिकाख्ये महातन्त्रे

विद्यापादे

दशमः पटलः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(एकादशः पटलः)

ऋषयः —

जानात्यणुः कथं वान्तःकरणानि न साधवः ।

ज्ञातानि त्वा महेशाना बाह्याङ्गैर्गहनो विधा ॥ 1

ईश्वरः —

यदान्तःकरणेनात्मा जानाति ज्ञेयमं सदः ।

क्षमाद्बुधि गरु दृष्टं ज्ञानानां नियमेन हि ॥ 2

सुखादि प्रतिपत्तीनां मपरोक्षत्वमिष्यते ।

कासाँचित्प्रतिपत्तीनां परोक्षत्व मुनीश्वराः ॥ 3

तेनान्तःकरणा नानाश्चत्वार्यैव तानि वै ।

विद्या बुद्धिरहंकारो मन इत्यत्र चादिमम् ॥ 4

सुखादौ प्रतिपत्त्यन्ये साक्षात्कार विधायिकः ।

यद्विकारसुखाद्यर्थं सा बुद्धिर्भुवनाश्रयः ॥ 5

प्रतिपत्रस्वरूपस्य प्रकाक्षमहंकृति ।

इच्छारूपमतस्तत्र विद्याग्रहणमुच्यते ॥ 6

मले विदारिते जन्तो रिच्छाया शिवनिष्ठया ।

उद्भिन्नकर्तृशक्तित्वा चिकीर्षाविविद्वां प्रति ॥ 7

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रवर्तते तदा जन्तुर्विधामासन्नपातिनीम् ।

आलम्ब्यालम्ब्य बीजानि बुद्धिधर्माननेकशः ॥ 8

ऋषयः —

धर्मो ज्ञानं च वैराग्यम् ऐश्वर्यं तद्विपर्ययः ।

बुद्धिधर्मा समा एषाँ प्रवादोऽनादिरेव हि ॥ 9

भोगेन पूर्वशेषे हि नव एव पुनः पुनः ।

वर्षास . ष्टिनियतौ प्रवाहाः सरितामिव ॥ 10

भोगश्चैषां . . . न साक्षादुपपद्यते ।

भामश्यद्विययां साक्षा द्यः करं . त्व वर्तिना ॥ 11

एवं भोग्यास्तु जन्यन्ते धर्माद्यैर्निजधर्मिणी ।

Repeated {
सुखाद्यद्यत्कृताण्यत्के त्वादाराद्वारिकाक्ष यत् ॥

ऋषयः —

ज्ञानं यदि भवेद्धर्मो द्यैन्निज धर्मिणी ।
}

सुखाद्यद्यत्कृताण्यत्के त्वादार द्वारकाक्षयत् ॥

ऋषयः —

ज्ञानं यदि भवेद्धर्मो बुद्धिस्ते ह्यात्मना भवेत् । 12

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अचेतनत्वे तस्यास्तु नैतद्युक्तं घटादिवत्।

ईश्वरः — (१७५)

ज्ञातृ . . . वच्चैतन्यहेतुर्न ज्ञानधर्मिता॥ 13

सचेतनं च विज्ञानं रूपादीमिव मिश्रितम्।

तेन तद्योगमात्रेण ज्ञातृत्वमुपजायते॥ 14

अज्ञातचारिताजानं ज्ञानरूपकम्।

प्रवर्तते वर्तते चैत्र . . समुद्भवः॥ 15

बहिर्गावायते भित्तिश्चित्रमाहमिति द्विजाः।

यथा पुमात्महा रत्नभूषणै . लंकृतः॥ 16

ज्ञातृत्वमात्रसारं हि चेतनाना मुनीश्वराः।

नापरान्नं स्वरूपं तु लक्ष्यते युक्तिकोटिभिः॥ 17

अन्यत्तमेव ज्ञातृत्वं वस्तुतत्त्वावधारणे।

एका स्थौल्या विशेषान्या स्थैल्यशेषा परा मता॥ 18

ऋषयः—

त्रिप्रावस्थोपरित्यागे कारणं किं भवेद्वद।

पूर्वावस्थापरित्यागे दृष्टं सर्वत्र कारणम्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ऋषयः —

अनित्यं सकलं कार्यमिति तावत्सुनिश्चितम् ।

कार्यं ते परमाणूनां कथं नाशो भवेद्वद ॥ 19

ईश्वरः —

अदर्शने भावानां नाश इत्युच्यते द्विजाः ।

स एव च तिरोभावो तन्तुच्छेद स्वरूपतः ॥ 20

अत्यन्त संकुचद्देश कालावस्था ह्यणुं मनः ।

माययास्तावता जज्ञात सदा तस्य तिरोहिनी ॥ 21

ऋषयः —

तत्रावस्थोपरित्यागे कारणं किं भवेद्वद ।

पूर्वावस्थापरित्यागे दृष्टं सर्वत्र कारणम् ॥ 22

ईश्वरः —

मायायाः प्रथमारम्भे कारणं यन्न दर्शितम् ।

तदिहात्रापि मन्तव्यं नापरं किंचन द्विजाः ॥ 23

ऋषयः —

व्यापिनी यदि मायेयमात्मवत्संमता विभो ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तथा च तत्समुत्थानमायायां मूर्तिशालिनाम् । 24
नित्यं स्वयं प्रसज्येत प्रत्युप्तमणिवत्प्रभो ॥

ईश्वरः —

व्यापित्व नेदृशं विप्रा मायया इह संमतम् । 25
किंच शेषश्च कार्याणां कापि त्वाद्व्याप्यतो यते ॥

यथा स्वविषयं सर्वसामान्यं व्याप्य वर्तते । 26
तथेयमपि सा व्याप्य स्वकार्यमाधितिष्ठति ॥

कालादि क्षिति पर्यन्त कार्याच्चोर्ध्वमधश्च वा । 27
वर्तते कार्यनिर्मुक्ता संपुट द्वयरूपिणी ॥

ऊर्ध्वाधश्छादने ख्याते तेनाख्या अङ्गसंश्रये । 28
कलाया अपि विस्तार ऊर्ध्वं शतगुणाधिकाः ॥

तदधः सम्पुटे रुद्रात . . सन्ति महौजसः । 29
अजेश्वरस्तु साध्यश्च तथा हरिहर प्रभुः ॥

दशेशानस्त्रिकालश्च षष्ठः पतिरुदीरितः । 30
ऊर्ध्वे च संपुटे विप्रा रुद्रषट्कं निबोधत ॥

क्षेमीश्वरो ब्रह्मस्वामी विद्येशास्ततः परः । 31

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विश्वेश्वरः शिवश्चैव अनन्तस्तु षडेव हि ।
ऊर्ध्वमायापुटस्थास्तु एते रुद्राः प्रकीर्तिताः ॥ 32
मायामध्ये - - - भवदेतेषु वस्तुषु ।
ऋषयः —
का मायासा कथं सिद्धा न्याकारो श्चास्याश्च कीदृशः ॥ 33
एकैव कथमेतानि सत्त्वानि जनयिष्यति ।
ईश्वरः —
माया तौ धनदुर्ज्ञेया सूक्ष्मापि च मुनीश्वराः ॥ 34
कलादिक्षितिपर्यन्तैस्वकार्यैः परिभाव्यते ।
आविर्भावा तिरोभाव धर्मका स्वाश्रयास्तथा ॥ 35
सर्वे भावास्ततो नित्यं स्थूलसूक्ष्मद्वयात्मकः ।
अव्यक्तातातु सूक्ष्मत्वं व्यक्तता स्थूलरूपता ॥ 36
कारणं कार्यतः सूक्ष्मँ तथाव्यक्तेतरावृतः ।
घटावस्थामपेक्षेयं सूक्ष्मावस्था मृदो भवेत् ॥ 37
भूम्येकदेशे मृत्पिण्ड सूक्ष्मावस्था मुनीश्वराः ।
गन्धतन्मात्रभावस्तु सूक्ष्मावस्था तु वो मत ॥ 38

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तन्मात्रस्यातिसूक्ष्मा सा अहंकारैकदेशतः ।

अत्यन्तसूक्ष्मावस्थैकदेशो बुद्धेरहंकृतः ॥ 39

अतिसूक्ष्मतरावस्था प्रकृतेरेकदेशतः ।

अतोऽभिसूक्ष्मावस्था स्यात् कला एकदेशतः ॥ 40

तत · सूक्ष्मावस्था मायांशा इष्यते ।

एवं परमसूक्ष्मायावस्था मायेति सेष्यताम् ॥ 41

आविर्भवन्ति तस्याश्च कला द्यास्त राशयः ।

एवं परमसूक्ष्माया व्यापिनी स्वैकदेशतः ॥ 42

कलाभावेन वर्तेत मायाया स्थौल्य · · शा ।

स्थौल्यावस्था हि प्रथमा कलापि स्यात्प्रकीर्तिता ॥ 43

5-B कलानां तथावस्था सूक्ष्मावस्थापि/चेष्यते ।

कलावस्थैकदेशेन स्थौल्यं याति ततः परम् ॥

आँ · · भावो ह्ययं तेषां यत्स्थौल्यमिति कथ्यते । 44

एवं क्लित्यन्नमेष्टव्या मायावस्था मुनीश्वराः ॥ 45

स्वांशानां च कपालानाम् एवमेतद्धि हेष्यते ।

पूर्वावस्थापरित्यागादवस्थान्तरता ततः ॥ 46

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

सृष्टिप्रकारो ह्येषोऽपि द्विधा सृष्टिः ततो मता।
ज्ञानैरेभि किमीशान विना युक्त प्रगल्भते ॥ 47

ईश्वरः—

ज्ञानक्रियानिदानत्वं ज्ञातत्वं तावदिष्यताम्।
क्रिया च फलहीना नोच्छेदनादौ तथेक्षणात् ॥ 48
ज्ञानक्रियाफलं ज्ञानं यते दुपलभ्यते।
अन्यत्र दद ेलग्नच्छेदने तच्छिदा यथा ॥ 49
किंच स्पष्टमिदं ज्ञानं प्रत्यक्षमवधार्यते।
शक्यते नापलापोऽस्य तत एव प्रमाणतः ॥ 50
स एव तदा ज्ञानमपरं ध्रुवमिष्यते।
क्रियान्तरसमुत्पत्तौ ताप्येवमवस्थिते ॥ 51
न क्वापि लभ्यते तस्य नित्यमिति ततः परम्।
सुभातमङ्गयो र्दृष्टेरुभयं नोपलभ्यते ॥ 52
यदत्र नित्यं विज्ञानभासनं भासकात्मकम्।
तदेव स्यात्मनो रूपमिति सम्यग्विभाव्यताम् ॥ 53
स्मृतिरप्येवमेवाह साक्षि येनेत्यतः खलु।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अतो न ज्ञानयोगेन बुद्धे ज्ञातृत्व मिष्यताम् । 54
धर्मादिबुद्धिधर्मत्वमेमे व प्रतीयताम् ॥
अविकारी यतो ज्ञाना ज्ञानयो · त्कधर्मिणोः । 55
अस्ति भेदस्ततश्चायं विकारी स्यात्प्रकल्पित ॥
यतो विकारो धर्माद्यो धर्मिणो नापराध्यति । 56
तस्मातचैव धर्मो यैस्वकार्यैर्जन्यते बहु ॥
सुखसिद्धश्च धर्मेण जन्यतेऽशाध्यतेच्छया । 57
सुखनानाविधे चित्र साधनाधीनमास्तिकाः ॥
तदा लोकान्तरे चापि समास्मा सा देवमीरितम् । 58
यदा निवृत्ते रजसि शुद्धे तत्वे · तो भवेत् ॥
सदाचारवतः पुंसि शिवस्य करुणापतेः । 59
शैथिल्याद्दिह भोगेषु प्रकृष्टस्याभिलाषया ॥
तदा दर्शनसिद्धार्था जिज्ञासा जायते पशौ । 60
ततो दर्शनसंसिद्धे तज्ज्ञानं सुदृढं भवेत् ॥
सा सिद्धिरुच्यते सा च दशधा कथ्यते यथा । 61
गुणाश्रयः सत्वमुखा स्वकार्यं चेतना इति ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

दृढं पञ्चात्मकं ज्ञानं सिद्धिः पञ्चात्मिकत्वियम् । 62
निमित्तभेदादेवैषा भवेदष्टविधा द्विजाः ॥

सांसिद्धिका देवधर्मा यदा हेत्वन्तरोचिता । 63
अजायत यदा पुंसां सिद्धिदा सिद्धिदा मता ॥

आध्यात्मिकादिदुःखानां प्रत्येकं परिबाधिकाः । 64
तदर्थमेव निष्पाद्या तदा ख्याति सरीतः ॥

दिशात्र श्रवणादेव यदा कृत्स्नाद्यगोचरा । 65
सा सिद्धिरपरान्या तु स्वयं शास्त्रविचारणात् ॥

गुरुतोर्थान्यथाशास्त्रमन्या वैविध्यमप्यदः । 66
दानाद्यैर्दुष्कृतं से · T यासिद्धिः सा परा मता ॥

तत्पात्रमेव हि जगत्कारणं न परं ततः । 67
तदेव ब्रह्म विज्ञेयं कैवल्यं येन दर्शनम् ॥

अन्यदिन्द्रियचैतन्यं यदि दर्शनमास्तिका । 68
इन्द्रियाणां प्रवृत्तिश्च निवृत्तिश्च यदाश्रिताः ॥

तदवेति मनः प्राहुस्तदेव प्राप्तिमित्यपि । 69
निरुपाख्यमहं बुद्धिं स्वभावं ब्रह्म · T परम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तदेव प्राप्तमित्याहुरहंकारैकवादिनः । 70
ज्ञानं बहुविधं वात्र धारावहनशीलकम् ॥

संकेतवासनायोगाद्भवेद्भर्त्सनकारणम् । 71
ततोऽधिकं न किंचि. सुषुप्तीति प्रपेदिरे ॥

बुद्धिरिच्छा सुखं द्वेषो दुःखयुक्तो बृषावृषौ । 72
संस्कारश्चेति जीवानां धर्म इत्यपर विदुः ॥

बुद्धिमेव हि ते जीवा मन्यन्ते वा परं चितम् । 73
अन्येव धारणं हित्वा सर्वमप्यर्थसंचयम् ॥

यस्यादस्ति चेत्याह गुणसिद्धा हि ते मताः । 74
गुणानां चलरूपत्वात्तद्रूपसै. . .न्तनात् ॥

वासुदेवो हि जगतः प्रसूतिर्नापरं त्विति । 75
अव्यक्तमेव मन्यन्ते गुणकारणतोन्मितः ॥

जीवमेव प.र प्राहुः प्राप्य ना परमीश्वरः । 76
प्राणादिभूतसन्दोहमपरे चेतना विदुः ॥

कालो भूतात्मकं जीवमणुरूपं प्रचक्षते । 77
शरीरमेव मन्यन्ते जीवं नाकल्पिता पुनः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ज्योतिःशास्त्र . . . रा भुवनप्राप्तिमेव हि। 78
मोहमाहुरिमे भूतसिद्धाः पूर्वे च सुव्रताः॥
प्राप्यैकजात्यतः सिद्धिर्दशकं परिकीर्तितम्। 79
प्रत्येकमष्टधा भावादशीतिरिति रिति सिद्धयः॥
दृष्टिसंख्यानुसारेण शतस्यात्वदशाधिकः। 80

ऋषयः —

ननु पञ्चात्मिकी सिद्धिरेकैवोक्ता महर्षिभिः।
इतरास्तुष्टयः प्रोक्ताः कथं सिद्धिर्वद त्वमूः॥ 81

ईश्वरः —

यदा पञ्चात्मिकी सिद्धिः कस्यचित्प्राप्तिकारणम्।
तथैता अपि तत्त्वानां प्राप्तये कारणं द्विजाः॥ 82
अर्थसिद्धिःप्रदा ख्याता ज्ञानरूपा भयापि च।
तुष्टेर्वैराग्यभूतत्वान्नामूषाँसिद्धितोचिता॥ 83

इति कामिकाख्ये महातन्त्रे

विद्यापादे

एकादशः पटलः॥ २०४

श्री.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ऋषयः —

सिद्धान्तासिद्धविज्ञानं न कस्मात् सिद्धिरुच्यते ।
कस्माच्चोपनिषत्सिद्धं ज्ञानमत्र न कीर्तितम् ॥ 1

ईश्वरः —

मले निवर्तिते ज्ञानाद्दीक्षया वा मुनीश्वराः ।
परमात्मा यदा ज्ञातस्तदा कैवल्यमश्नुते ॥ 2

न हि तद्विषयज्ञानं बुद्धिधर्मो मुनीश्वराः ।
किं तु स्वरूपचैतन्यमात्रमावरणैरितम् ॥ 3

सिद्धस्तु बुद्धिधर्मत्वात् तत्परिकीर्तितम् ।
सिद्धान्तान्नैव वेदान्ते विशेषः कोऽपि विद्यते ॥ 4

परमात्मपरिज्ञानादुभयोरपि निर्वृतिः ।
कथ्यते वस्तुसंबोधोऽपि तुल्यमेव निरूप्यते ॥ 5

भिद्यते हृदयग्रन्थिश्छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते सर्वकर्माणि तस्मिन् दृष्टे परापरे ॥ 6

चत्वारि वाक्परिमिता आत्मा वाङ्मय इत्यपि ।
यजुर्वेदः शिरस्तस्येत्यादौ बिन्दुप्रसाधने ॥ 7

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

न्यग्रोधस्यास्य महता स्तिति सूक्ष्मे वदन्त्यसौ ।
अग्राह्ये जगतः सूतिं मायान्तेन ब्रवीति हि ॥ 8
मायामयमिदं सर्वमद्वैतमिति यद्वदेत् ।
मायातिरिक्तहेतुर्थमिह नेति ब्रवीति तत् ॥ 9
उपादानवतोक्तिस्तु जगतो यमुनीश्वराः ।
मायाया ब्रह्मशब्दत्वात् सा सिद्धान्ताविरोधिनी ॥ 10

ईश्वरः —

. . ज्ञानीशावसौ द्वौ ता . . . . ।
यथोपनिषदो ब्रूयुः सिद्धान्तोऽपि पशुं तथा ॥ 11
तस्मादभेदः सिद्धान्ता वेदयो प्रतिपादने ।
सिद्धिरेवं समाख्याता विद्यया वेत्ति तावपि ॥ 12
एतेन ज्ञानमप्युक्तं तुष्टं हो निबोधत ।
धर्माद्यैः सात्त्विकैरीश बुद्धि धर्मादिकं यथा ॥ 13
नाना रत्नसिद्धेन प्रकारेणात्मदर्शने ।
अध्यस्यमाने बहुतृप्तिस्तत्र प्रजायते ॥ 14
6-A वैराग्यदन्यपीपाये तेन सा दशधा स्मृता ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वैराग्यहेतुभूतेन प्रत्येकं दशधा भवेत्। 15
व्याधित प्राणि सन्द्र . ाकाद्य . . ध्रुकैरपि ॥
अर्जुनारोदना - - - . . देव स्वतः। 16
प्रतिग्रहादशुद्धेभ्य विरक्तिर्दशधा भवेत् ॥
तत्कृतं तुष्टयोर्द्वा चत्वारिंशाद्दिहापिकाः। 17
जुगुप्साध्यामिकीत्याद्या निस्वा चैव प्ररोदिका ॥
विडम्बा कामभूश्चैव तथा वैखानसाभिधा। 18
वैराग्येण विरक्तस्तु पर्येन्नापि भूयते ॥
ऐश्वर्यमणिमाद्यष्टभेदभिन्नं समासतः। 19
योगिनामितरेषां तु नानाभुवनवासिनाम् ॥
प्रत्येकमष्टधा भेदाश्चतुष्षष्टिरुदाहृताः। 20
ब्रह्मादिना बहुगुणं समासाद्विभागितम् ॥
Kalottara T.S.P. 10.52 n.369 'अणिमा महिमा चैव गरिमा लघिमा तथा। 21
ईशित्वं च वशित्वं च प्राप्तिः प्राकाम्यमेव च ॥
अधर्मे दशधा ज्ञेयं सिद्धवत्तद्विपर्ययात्। 22
अधर्मेण पुनर्जन्तुर्निन्दितां कुरुते क्रियाम्।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

धर्मेष्वनाभिरमते न शृणोति गुरोर्वचः। 23
द्रोहमोवाच साधूनां नित्यमे चिकीर्षति॥

जुगुप्सते निजां भार्यां परभार्यां च काङ्क्षते। 24
चौर्यादौ वर्तते नित्यं परस्वहरणोद्यतः॥

दयालेशं न जानाति क्रोधमेवानुवर्तते। 25
बुद्ध्यां त्वधर्म दृष्टायां रजः सत्वानि वर्तते॥

तस्मात्तु केवल निष्ठा वा प्राप्नोत्यज्ञानकारणम्। 26
तदा विपर्ययज्ञानं जायते ज्ञानमानकम्॥

तमो माहो महामोह तमिस्रो वान्धपूर्वकम्। 27
तामिस्र इति तस्यैते पञ्च भेदा समासतः॥

अनात्मन्नात्मबुद्धिर्या अनध्यास विपर्ययः। 28
मोहः परमबुद्धिर्या त्वणिमादिषु सिद्धिषु॥

दृष्टानसवि कार्येषु परत्वप्रत्ययात्मक। 29
विपर्ययो महामोहस्तामिस्रोऽपि निगद्यते॥

यः सन्तापो विवोको यः सर्वांशा दशधा ततः। 30
इत्यमेवान्धतामिस्रो · क्लीष्टेषु सन्धिषु॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

उपघाते परेभ्याते दुःखस्यात विद्धि पञ्चमम्। 31

चतुः षष्टिप्रकारोऽयं व्याख्यातोपो विपर्ययः॥

अवैराग्यद्वशा सिद्धया तुष्टिपूर्वविपर्ययात्। 32

अवैराग्येण पूरुषो विषयेष्वनुरज्यते॥

जुगुप्तेन तान् भावान् जुगुप्या विषयाणि ये। 33

अनिन्दति च सर्वत्र न दोषलवमीक्षते॥

अणिमाद्यष्टका भाति वाङ्शरीरे शक्तिरेव च। 34

सा शक्तिर्द्वादश विद्या नैश्वर्याच्च प्रकीर्तिताम्॥

एवं धर्माद्रिभिर्बुद्धौ विद्याविषयसिद्धये। 35

अयं प्रत्यक्षसहितैः क्रियते जनः॥

जिज्ञासोरीश्वरेच्छातः क्रियाशक्त्या प्रचोदितम्। 36

अशद्धात्रयया बाह्यमीरये द्बुहेरिन्द्रियम्॥

तत्प्रेरितो बहिर्देव समर्थमाधितिष्ठति। 37

ततः संजायते वस्तु विपर्यज्ञानमुक्तवत्॥

अपसृत्य ततः शीघ्रमहंकारं विशेषतः। 38

ज्ञातमेवेत्यहंकारवृत्तिःसंजायते ततः॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अहंबुद्धिः समाख्याता ततो बुद्धि प्रवर्तते । 39
पूर्वानुभूत संधान संधान भावना . . ललम्भिता ॥
स एवायमिति ज्ञानं वर्त सात्तत्वानिश्चितम् । 40
त्रिकालविषया बुद्धिः प्रत्ययं जनयत्यपि ॥
भावनाशब्दलिङ्गादि साधना चित्रशक्तिका । 41
भोक्ता विद्यया भोगान् भुङ्क्ते स प्रत्ययात्मकान् ॥
एवं ज्ञानक्रिया ज्ञातुस्तत्तत्प्रत्ययग्राहिनी । 42
देहेन्द्रिया व्या . . सममेवोपपादिता ॥
ईश्वरेच्छां समां ज्ञात्वा . . यंजिज्ञासते पशुः । 43
ज्ञातपूर्वेषु जिज्ञासां . . संस्कारोपजायते ॥
इतरेषु परोत्कृष्टा जायतेऽपि शिवाज्ञया । 44

इति कामिकाख्ये महातन्त्रे

विद्यापादे

द्वादशः पटलः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ईश्वरः —

स्वरूपमिति विप्रेन्द्राः पशूनां यत्प्रकाशितम्।
एषामेवाधुना वक्ष्ये भेदमत्र निबोधत॥ 1

ऋषयः —

पशवस्तु चतुष्पादो द्विपादश्चेति शुश्रुमः।
देहमात्रमभवश्च्यूतो तत्कथं परमेश्वरः॥ 2

ईश्वरः —

गतिः शब्दप्रयोगेषु गौणमुख्यमिति द्विधा।
अभिमीवृत्यमाश्रित्य मुखे मुख्या प्रयुज्यते॥ 3
शृण्व प्रतीतिमाधातुं गुणः प्रयुज्यते यदा।
तदात्र पशुसाधर्म्यमभिप्रेत्य शरीरषु॥ 4
पशुशब्दप्रयुक्तोऽयं नान्यथा मुनिपुङ्गवाः।
बध्यन्ते पशवः पाशैर्नच स्वैरप्रवृत्तयः॥ 5
प्रत्यधीनाश्च संतुष्टैः प्रत्यौ श्रेयो व्रजन्ति च।
हिताहिताप्तिहानार्थमुपाये मूढचेतनाः॥ 6
गवाद्याः पशवो दृष्टास्तत्साधर्म्यमिहास्ति वै।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तेनैते पशवः प्रोक्तास्तत्साधर्म्यविवक्षया । 7

प्रति तत्रापि मूढाश्च प्रपद्यन्ते मलादिभिः ॥

न च लोकान्तरप्राप्तौ तद्वत्कले स्वैरवृत्तयः । 8

विरोधकत्वे साधर्म्यात्पाशत्वं च मलादिषु ॥

पशवस्त्रिविधा ज्ञेयाः सकलाः प्रलयाकलाः । 9

विज्ञानकेवलाश्चेति तेषां लक्षणमुच्यते ॥

मयाकर्ममलैर्युक्तः सकलस्तत्र कथ्यते । 10

मलकर्मयुते विप्रा प्रलयाकल इष्यते ॥

ऋषयः —

धर्मिणो बुद्धिधर्मत्वाद्बुद्धेः प्रकृतिजं तमः । 11

अनयो ·त्वात् प्रकृतेस्ते मायारहिताः कथम् ॥

विनात्र कारणं कार्ये कथा चिन्ताधितिष्ठते । 12

तथा महोपे संसारो मायायां कर्मणो बलः ॥

मायाभावे कथं कर्म कर्मभावे . . . । 13

. . समायोगे मेलने . . च्यते कथम् ॥

ईश्वरः —

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्राकृतं कार्यमत्रोक्तं मायोतिभुवनादिकम् ॥ 14
अक्षयं सकलो विप्राः प्रकृतेः पुरुषस्य च ॥
विवेकदर्शनान्मुक्तः सृष्ट्या प्रकृतिलीलया ॥ 15
मायोदनिषान्तः तदा स्यात्प्रलयाकलः ।
न मुक्तस्तवता यस्मादतः कर्मसमाश्रयः ॥ 16
मलेच्छन्नचैतन्यस्वरूपेणापतिष्ठते ।
गुणतत्वोर्ध्वभुवने भुङ्क्ते भोगात्स्वकर्मणा ॥ 17
प्रप्रधानपुरुषज्ञानतादृशः कर्म जायते ।
भुवनेषु तदा भोगः प्रकृतेरूर्ध्ववस्तुषु ॥ 18
पञ्च मायाप्रसूतानि तत्त्वानि गुणमूर्धनि ।
वर्तमानान्वनुल्लङ्घ्य कथमेष शिवं विशेत् ॥ 19
गुणात्ममात्रविज्ञानान्न कलादेरपि क्षयः ।
भवेद्गुणविवेकोऽपि युक्तः स्यादन्यथा यदि ॥ 20
मायामपि यदा विद्यात्प्रधानपुरुषो विद् ।
विज्ञानकेवलो जीवः स एव सकलो भवेत् ॥ 21
मायामतीत्य वर्तेत यदा प्रलयकेवलः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तदा सोऽपि समाख्यातो विप्रा विज्ञानकेवलः। २२

इति कामिकाख्ये महातन्त्रो

विद्यापादे

त्रयोदशः पटलः ॥

श्री

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ईश्वरः —

एवमुक्तः पशुर्विप्राः पाशं शृणुत संप्रति ।

स च पञ्चविधः पाशो मलादिप्रविभागतः ॥ 1

6-B मलं कर्म च मायाच शक्तिश्चापि निरोधिका ।

बिन्दुश्च पशुभेदेन वैरेहिर्बध्यते पशु ॥ 2

तथानादिमलस्त्वेकश्चित्रशक्तिशतावृतः ।

दृक्क्रियाच्छादकः पुंसः विशुद्धस्य स्वभावतः ॥ 3

पशुत्वंव्यवहारस्य निमित्तं त्रिविधाणुषु ।

(va?) yat saṁbhavamātreṇa /

यद्भावमात्रेण न च मोक्ष व्यवस्थिति ॥ 4

अपयाते मले ह्यास्मिन् सर्वतोदित दृक्क्रियः ।

nirātaṅkam vimathyam

निरात्मकं निराबाधं शिवत्वमधिगच्छति ॥ 5

चिद्रूपस्तावदात्म यमव भासात्प्रतीयते ।

स्वोध नाच्छाद्यते स्वापे केनापि खलु वस्तुना ॥ 6

प्रतीतिसिद्धं सर्वेषां विवेकाय विपश्चिताम् ।

यावत्काला प्रवर्तेत तावन्नाच्छादयेत्यणुम् ॥ 7

प्रकाशते गृहे दीपे स्तिमिरं नैव सर्पति ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यावत्कालोपरमते तावदेव प्रसर्पति ॥ 8

एषा हि दृश्यतेऽवस्था निद्रोपक्रमकारिणि ।

धर्माधर्मात्मकं कर्म प्रतिपुं नियतद्विजाः ॥ 9

सुखदुःखविचित्रत्वे न हि हेतु मृगे पशोः ।

स्वभाववादो नैवात्र क्रमते संशितव्रताः ॥ 10

स्वभावो यदि भाव स्यान्न किंचित्कथितं ततः ।

भावातिरेकवातेषु तदा नामान्तर द्विजाः ॥ 11

स्वभावश्च पदार्थानां यावद्भावं हि लक्ष्यते ।

नान्यथास्य विपर्यासस्तदा वेदी दृढोऽवन ॥ 12

तथा दुःखिनः पुंसो दुःखितोऽप्युपलक्षिते ।

न हि स्वभाववैक्षुर्यमेकस्येति समञ्जसम् ॥ 13

एकदेव न वै दृष्टं स्वभावद्वयमेलनम् ।

अस्वभावविवादोऽयं कथंचिन्नोपपद्यते ॥ 14

अनिदं प्रमं चैतत्कर्म पुंसां द्विजोत्तमाः ।

अनादिसिद्धसंसारे यत आदिर्न लक्ष्यते ॥ 15

मायाकलादिक्षित्यन्त कार्यहेतुरिहेष्यते ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भावात्मिकाऽविग्रमाया: सूक्ष्मरूपा द्विजोत्तमाः । 16
स्वकार्यक्षितिदेहादेः कारणत्वेन लक्ष्यते ॥
तावदेतत्परिज्ञानं न कार्यं कारणादृते । 17
घटादेः कारणं मृत्सा तत्स्थानभूतत्र वापरम् ॥
एवं कारणविश्रान्तिर्यत्र माया हि सा स्मृता । 18

ऋषयः —

मायया जन्यते विश्वं कथमेतच्चराचरम् ॥
कलादयश्च किं रूपाः कथयस्व विशेषतः । 19

ईश्वरः —

माया चित्क्षोभमायाति येन केनाकुलीकृताः ॥
ततः कलां प्रसूयेत रागविद्ये कला पुनः । 20
पूर्वतः कथिता सम्यक् कलामलविदारिका ॥
विद्याणोः करणं प्रोक्तं नियतिश्च नियामिका । 21
पुराणनवभेदादि हेतुः कार्यस्य वस्तुनः ॥
कालो रागस्तु पुरुषे जनये भोगलोलिताम् । 22
पुंसोऽज्ञः कर्तृभावस्तु एतत्पञ्चकसंश्रयः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कलातो जायतेऽव्यक्तं गुणतत्त्वस्य कारणम्। 23
अभेद्या बुद्धिरुत्पन्ना कारणं पुरुषोत्तमाः॥

सत्त्वं रजस्तमश्चैव गुणाः सत्त्वप्रकाशकम्। 24
सत्त्वं रजः क्रियाहेतुस्तमः सावरणात्मकम्॥

बुद्धौ भवेदहंकारस्त्रिविधः संप्रकीर्तितः। 25
येन जीवति संसक्तस्तथा गर्वायते पशुः॥

सात्त्विको राजसश्चैव तामसश्चेति कथ्यते। 26
सात्त्विकात्तत्र जायन्ते मनोबुद्धीन्द्रियाणि च॥

वैकारिकात्कर्मदेवा जायन्ते कर्मसिद्धये। 27
तन्मात्राणि तु भूतादेर्येभ्यो भूतसमुद्भवः॥

श्रोत्रत्वक्चक्षुर्जिह्वा च नासा ऽक्षियपञ्चकम्। 28
वाक्पादपाणी पायूपस्थाः कर्मेन्द्रियाणि च॥

तन्मात्राणि तु भूतानां सूक्ष्मावस्थाः प्रकीर्तिताः। 29
श्रोत्रेण गृह्यते शब्दस्पर्शस्तु स्पर्शनेन च॥

रूपस्य ग्राहकं चक्षू रसस्य रसतामति। 30
घ्राणेन्द्रियं तु गन्धस्य ग्राहकं परिकीर्तितम्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पच्चनादानं विहरणमुत्सर्गश्च सुखं तदा । 31
कर्मेन्द्रियाणां व्यापारः क्रमेण परिकीर्तितम् ॥
आकाशं वायुरग्निश्च सलिलं धारिणी क्रमात् । 32
तन्मात्रेभ्यः प्रजायन्ते भूतनामानि सुव्रताः ॥
शब्दैकगुणमाकाशं शब्दस्पर्शगुणो मरुत् । 33
शब्दस्पर्शरूपगुणः कृशानुः परिकीर्तितः ॥
शब्दस्पर्शरूपरसगुण आपः प्रकीर्तिताः । 34
शब्दस्पर्शरूपरसगन्धयुक्ता वसुन्धरा ॥
अवकाशप्रदं व्योम व्यूहरं मरुत क्रिया । 35
पावकस्य क्रिया पाका ह्यपां संग्रहणं क्रिया ॥
पृथिव्या धारणं कर्म भूतव्यापार ईरितः । 36

इति कामिकाख्ये महातन्त्रे

विद्यापादे

चतुर्दशः पटलः ॥

श्री

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(पञ्चदशः पटलः)

ऋषयः —

वस्वादेर्गुणः शब्द इत्येतद्भवतोदितम् ।
रूपादयो गुणास्तेषां तत्तदाश्रयवर्तिनः ॥ 1
न च सोऽपीदृशः शब्दः कथं तेषां गुणो भवेत् ।

ईश्वरः —

प्रत्यक्षावद्धृतेऽर्थे तु कः संदेहो द्विजोत्तमाः ॥ 2
तत्तत्व्यानुगुण्येन शब्दभेदो हि दृश्यते ।
दूरान्तिकादिविज्ञानं शब्दे स्यादन्यथा कथम् ॥ 3
यावद्दूरे भवेद्द्रव्यं तावद्दूरत्वधीप - - ।
नोतर्वां नाप्यतो दूरे शब्द इत्यस्ति वै मतिः ॥ 4
रूपादिवदते धर्मो भूम्यादेः शब्द इष्यताम् ।
तस्मादवसरश्रोत्रदेशे शब्दस्य संग्रहः ॥ 5
श्रोत्रस्य वृत्तयो गत्वा गमयन्ति बहिर्ध्वनिम् ।
अन्वदूरविज्ञानं कथंचिन्नोपपद्यते ॥ 6
अदृष्टे च नाधारे दूरस्ते दूरशब्दधीः ।
न च बाधयितुं शक्या नाधारो लक्ष्यतेऽपि च ॥ 7

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ऋषयः —

मायादिकं समुद्दिश्य किञ्चिदेव त्वयोदितम् ।

अतो न तेषां परमं रूपं न प्रतिभाति नः ॥ 8

सविशेषं ततः शंभो मायादीनि निरूपय ।

यथा न किंचन ज्ञानं सहजो समुद्भवः ॥ 9

शक्त्यादिभूतजातस्य कुरुते स्वेच्छया विभुः ।

मायाद्यवनिपर्यन्ता ये रुद्राः संस्थिता क्रमात् ॥ 10

भुञ्जते तव तत्रैव भोगान् प्रमुदिताः सदा ।

पश्चात् समाश्रित्य शिवतत्त्वं व्रजन्ति ते ॥ 11

व्रती संपरिध्वस्तविग्रहा गूढचेतनाः ।

अन. तेजसा सर्वे कृपया परितर्पितः ॥ 12

द्वादशामी कपालेशा वर्तते पूर्ववन्मुदा ।

उत्तरेऽपि च तत्कालप्राप्त संही . तो यदा ॥ 13

विहरन्त्यणवो भूयो मायायां क्रूरवृत्तयः ।

स्वस्वकर्मपरीपाकसुखदुःखादिभोगिनः ॥ 14

इति कामिकाख्ये महातन्त्रे विद्यापादे

पञ्चदशः पटलः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(षोडशः पटलः)

मायासृष्ट्यादिसमये योदितानन्ततेजसा ।
पुंसां सम्पर्कसंक्षुब्धा जनयोद्दितः कलाम् ॥ 1
मायाया क्षोभ्यमाणायाः विकारः प्रथमा कला ।
क्षितितेजः पयोयोगाद्बीजस्योच्छूनता यथा ॥ 2
विद्यतत्त्वादियं विप्रा ज्ञेया शतगुणाधिका ।
7-A प्राप्तकर्मोदयास्तत्र रुद्राः क्रीडन्त्यनिन्दिताः ॥ 3
वामदेवो महातेजा ज्येष्ठो रुद्रो महानलः ।
कालश्चतुर्थस्तत्रोक्तः कलाद्विस्वय पञ्चमः ॥ 4
रुद्रो विकरणस्तद्वद्बलादिः षष्ठ ईरितः ।
बलप्रमथनान्योऽपि भूतानां दमनः परम् ॥ 5
मतश्चैव महातेजा उन्मना दशम स्मृतः ।
आत्मोपमबलै रुद्रैरनेकैः परिवारितः ॥ 6
शिवज्ञाने पराः सर्वे नन्दन्ति भुवनेष्वमी ।
कलातत्त्वात्समुत्पन्नं विद्यातत्त्वमहं प्रभो ॥ 7
विद्यान्तरङ्गं करणं पुंसोऽर्थप्रविवेदने ।
यया जानाति विषयान् बुद्धिसंस्थान् सुखादिकान् ॥ 8

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आलिङ्गिते दृढं जन्तुर्जन्तुरेवाङ्ग पद्धतौ ।
यदन्तरति तन्मुर्त्तिबुद्ध्यादौ व्यावृतौ भवेत् ॥ 9

स्वाधस्तनादियं तत्त्वाद्भूमि शतगुणोत्तरा ।
नाना भोगसमृद्धानि भुवनान्यत्र सन्ति वै ॥ 10

तेषु रुद्रा वसन्त्येते शिवज्ञानमदोत्कटाः ।
आद्यो ह्येकशिवो नाम रुद्रो भुवनायकः ॥ 11

द्वितीयोऽनन्तरुद्रस्तु तृतीयोऽजेशनामकः ।
उमाकान्तस्तु चातुर्थ ईश्वरो नाम पञ्चमः ॥ 12

षष्ठः प्रचण्डरुद्रा स्यादेश वीरस्तु सप्तमः ।
अष्टमः सर्वरुद्रस्तु नवमो भवसंज्ञकः ॥ 13

उग्राख्यो दशमो रुद्रो भीमनामा ततः परः ।
द्वादशो वामदेवाख्यो रुद्रसदश वन्दितः ॥ 14

द्वादशैते महावीर्या रुद्रा भुवननायकाः ।
भुवनेषु निजाख्येषु क्रीडन्त्युत्कटशक्तयः ॥ 15

कलातत्त्वात्समुद्भूतं रागतत्त्वं वदाम्यहम् ।
रागो हि पुंसां भोगेषु साधनं शक्तिभेदतः ॥ 16

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

यं विना न प्रवर्तेत विषयेषु कथंचन ।
व । यन्नियमानो हि पुरुषो यश्च वर्तते ॥ 17
तत्रापि रागहेतुत्वं हन्तु पीडा जिहीर्षया ।
एवं स्वर्गापवर्गेषु सुखादि प्रवर्तते ॥ 18
हेतुत्वं रागतत्त्वस्य नान्यथा तु कथंचन ।
विरक्तस्यापि या वृत्तिः दुःखहेतुर्जिगीषया ॥ 19
तत्राप्युपायरागेण प्रवृत्तिरुपलभ्यते ।
तस्मात्सुखे प्रवृत्तस्य सुखादपि ॥ 20
रागो हि कारणं पुंसो बुद्धिधर्मविलक्षणम् ।
भवोद्भवौ महावीर्यौ लोकेशौ षष्ठसप्तमौ ॥ 21
अष्टमे भुवनेशानो रुद्रो भुवननायकः ।
एते रुद्रा महावीर्या रागतत्त्वेऽवस्थिताः ॥ 22
तत्रैव पौरुषे तत्त्वं प्टेशकि समन्वितम् ।
भूतेन्द्रियमनोबुद्धिगर्वतन्मात्रसंवृतम् ॥ 23
यदा प्रवृत्तनाशीलं निवसत्यभिषेकिकः ।
अथ कालं प्रवक्ष्यामि मायातत्त्वसमुद्भवम् ॥ 24

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वस्तूनां कलनात्कालोद्भवभूतभविष्यताम् ।
विशिनष्टि यतः कालं चिरं चेष्यति बन्धुभिः ॥ 25
पदार्थे तेन सिद्धोऽयं कालो लोककालतः ।
यदाश्रिया क्रियाः सर्वा विधीयन्ते द्विजोत्तमाः ॥ 26
कालेनैव फलं तासां लभते परिपाकतः ।
काले हि जायते वस्तु पुनः काले प्रवर्तते ॥ 27
कालोऽपि क्षीयते काले न . नश्य च विद्यते ।
दिनमासर्त्वन्तु वर्ष भेदैरेष च भिद्यते ॥ 28
तत्त्वादध्वश्च तादेष विस्तारेण शताधिकाः ।
विचित्रभोगयुक्तानां भुवनानां तथाश्रयः ॥ 29
. . भुवनाधीशः प्रथमोऽत्र प्रकीर्तितः ।
कालानलस्त्वधोभागे बलवीर्यमहो - न्तः ॥ 30
. . रश्चान्यो महासत्त्वो मतागश्च महाबलः ।
तस्याधो भुवने चण्ड शबरश्चापरो महान् ॥ 31
उच्छुष्मा भुवनेशान भुवनं तत्र रुद्रस्य गहनेशस्य संमतम् ।
अङ्गुष्ठमात्ररुद्रस्य ततो जातस्य धीमतः ॥ 32

Nalbaya
ulya
11.38 b.

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ईशानस्य ततोऽधस्ताद्भुवनं - - रि भोगदम् ।
एकपिङ्गेक्षणस्यान्यत्स्थूल रुद्र प्रतापवान् ॥ 33
याम्यो हलहल श्चैव रुद्रो हालाहल स्तथा ।
क्रोधेश - । दशैते काले भुवननायकाः ॥ 34
कालतत्त्वात्समुत्पन्नं नियत्याख्यं निबोधतः ।
नियामिका हि सर्वस्य चिदचिद्वस्तुनो यतः ॥ 35
उपभोगः फलं कर्म नान्यत्वेनं नियम्यते ।
तेनैव नियति श्चेच्छां नार्थवैचित्र्यमिष्यताम् ॥ 36
दुःखाय नियतं सस्तु फणभृद्वृश्चि कादिकम् ।
अन्यथा चन्दनादेश्च दुःखं वृश्चिकवद्भवेत् ॥ 37
सुखं वृश्चिकादे स्याद्यथा स्रक्चन्दनादिका ।
तस्मान्नियतिरस्त्वेषा सर्वभावनियामिका ॥ 38
एभिः कलादिभिस्तत्त्वैर्मलेन च समावृतः ।
अणुपुरुषोन्मुक्तस्तत्त्वं धाम व्रजत्यपि ॥ 39

इति कामिकाख्ये महातन्त्रे विद्यापादे

षोडशः पटलः

श्री

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अव्यक्तमथवा तत्त्वं मायातत्त्वं सत गतम् ।
वक्ष्यामि मुनिशार्दूल यत्प्रधानाभिशब्दितम् ॥ 1

पुरुषस्योपभोगार्थं यत्तो देहादि सृज्यते ।
नोपादानं विना कार्यं किंचिदप्यस्ति सुव्रताः ॥ 2

तस्माद्देहेन्द्रियादीनां यतो जन्म तदेव तत् ।
मायायाः साधने चास्य साधनं पूर्वमीरितम् ॥ 3

गुणत्रयसमावस्था रूपमेतन्निबोधत ।
अधोगताद्धि तत्तत्त्वा दशगुणोत्तरम् ॥ 4

भुवनाधीश्वरानत्र वक्ष्यामि शृणु तद्द्विजाः ।
क्रोधेश चण्ड संवर्त ज्योतिः पिङ्गलसूरकाः ॥ 5

पञ्चान्तकैकवीरौ च शिवेन सहिता अमी ।
भुवनेशा महावीरा वसन्त्यव्यक्तमूर्धनि ॥ 6

अस्मादुभववत्तत्त्वं गुणाख्यं चित्रशक्तिमत् ।
सत्त्वं रजस्तमश्चेति गुणात्र अप्रतिष्ठितः ॥ 7

इदं श्रीकण्ठनाथेन क्षोभितं जनयेज्जगत् ।
गुणात्मकं विचित्रं च गुणवृत्तिं निबोधितः ॥ 8

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

धैर्यं धैर्य . . . .

संतोषो मार्दवशौचं व्यवसा यक्षम मास्मृतिः॥ 9

सौहृत्यं पटुता क्षान्तिर्दया दानं घृणा सदा।

औत्सुक्यं चेति सत्त्वस्य वृत्तयःस्युः समा . तः॥ 10

क्रौर्यं शौर्यं महोत्साहः साभिमान सकलकता।

दार्ढ्यं च निर्दयत्वं च भोगो दम्भश्च वृत्तयः॥ 11

राजसप्रतिपत्तव्या तन्त्रेऽस्मिन् पारमेश्वरे।

अरतिर्मन्दता दैन्यँ पैशुन्यं गुरुता सदा॥ 12

निक्राधिक्यं मदालस्यं निरोधो मूढता तथा।

तमसो वृत्तयः प्रोक्ता सद्भिस्त्याज्या विशेषतः॥ 13

तेषामन्योन्य संयोगात्सृष्टिःसर्वा प्रवर्तते।

यत्राधिक्यं गुणो याति तत्र तस्यै . वृत्तयः॥ 14

प्रवर्तते मुनिव्याघ्राः तत्तत्कर्मानुरूपतः।

गुणतत्त्वमिदं . . श्रीकण्ठः प्रकृतेः पुनः॥ 15

द्विधा विभज्य स्वं वीर्यं वसन्त्यानन्दमेदुराः।

. . . . . म . वृत्त मेतत्तत्त्ववासिन॥ 16

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वीरभद्रादयस्तत्र ब्रह्म · लोकनायकाः।
निवसन्ति सदा शंभो कृपावर्धित संमदा॥ 17
7-B अन्त्यन्त गुरुजो मूर्ध्नि भुवनं विद्यते शुभम्।
स्कन्दं च भुवनं सत्त्वं स · श्वर्यसंकुलम्॥ 18
विष्णुं च भुवनं तत्र तानि शुद्धरजोमयम्।
ब्रह्मणस्तदधस्तात्तु भुवनं तमसाधिकम्॥ 19
विभोस्तमासे विज्ञेयँ रजसोन्मीलितं द्विजाः।
कृतनाम्ना पंस्थानं तमस्यैवं मनोरमम्॥ 20
रजसा संश्रितं किंचिदीषत् स · · ह्रियत्।
Malaya vw ya 16 31ax h 10. अकृतं शुद्धतमासे स्थानमुक्त मथाष्टमम्॥ 21
योगिनो योगसंपत्या कृताद्या भुवनेश्वराः।
रजोगुणो कृतावासा ब्रह्माद्या भुवनेश्वराः॥ 22
रजोगुणो कृतावासा ब्रह्माद्या भुवनेश्वराः।
सत्त्वं सोमां श्वविसद मरुणस्तु रजोगुणाः॥ 23
तमो नीलोत्पलप्रख्यं गुणं रूपमितीरितम्।
अतो बुद्धिस्ततो जाता धर्माद्यष्टगुणा स्मृताः॥ 24

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

विषयाध्यवसायस्य कारणं भोगसंभवः।

अस्या स्वरूपं कथितं विस्तरात्पशुनिर्णये॥ 25

अहंकारादि यत्तत्त्वं ज्ञेया दशगुणोत्तराः।

पैशाचं भुवनं तत्र राक्षसाख्यं तथापरम्॥ 26

आस्ते याक्षं च गान्धर्वं चैन्द्रसौम्य सुखास्पदम्।

प्रादेशं ब्रह्मणश्चान्यं भुवनं भूरिभोगदम्॥ 27

योगेश्वरा महात्मानस्वात्मोपासन तत्परः।

प्राप्नुवन्त्यमलं स्थानं बुद्धितत्त्वार्जितं द्विजाः॥ 28

अहंकारमथो वक्ष्ये बुद्धितत्त्वसमुद्भवम्।

संरम्भमानः सश्चैवै · ।पौरैस्त्रिभिर·तम्॥ 29

· या संज्ञा तु या शक्तिः पशूनां समवायिनी।

अभिव्यक्ति समायाति अहंकारस्य वृत्तिभिः। 30

इदमेव परं तत्त्वं यद्यात्मा विषयो भवेत्।

अहंकारभिदोऽन्यत्र ·ममकारांकितो व्रजेत्॥ 31

सत्त्वादिगुणसंयोगादयमेव त्रिधा भवेत्।

वैकारिकस्तैजसश्च भूतातिरीति च क्रमात्॥ 32

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

भुवनेशानथो वक्ष्ये अहंकारपदस्थितवान् ।
चकलण्डद्विरण्डं च माकोटं मण्डलेश्वरम् ॥ 33
कालञ्जरं शंकुकर्णं स्थूलेश्वरं स्थलेश्वरम् ।
स्थाणूनामष्टकमिदं पूर्वादीशान्तसंस्थितम् ॥ 34
स्फटिकोपलसंकाशं ताभिर्दैदीप्यते · · ।
पद्म पद्मनिभाकारः संनिवेशोऽत्र कीर्तितः ॥ 35
दिव्यं श्रीकण्ठनाथस्य भोगस्थानं महात्मनः ।

इति कामिकाख्ये महातन्त्रे

विद्यापादे

सप्तदशः पटलः ।

श्री

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

(अष्टादशः पटलः)

व्योमतत्त्वमथो वक्ष्ये शब्दतन्मात्रसंभवम् ।
सुसूक्ष्मं विमलं व्यापि वायोर्दशगुणोत्तरम् ॥ 1

निदानं सर्ववर्णानां भूतानामवकाशितम् ।
प्रतिश्रुत्याभ्यनुमितं नानाभुवनसंश्रयम् ॥ 2

वस्त्रापदं रुद्रकोटि अविमुक्त महालयम् ।
गोकर्णं भद्रकर्णं च सुवर्णाक्षं च स्थाणुकम् ॥ 3

पवित्रनाम्ना कथितं भुवनाष्टकमाश्रितम् ।
तप्तकाञ्चनसंकाशं भासते व्योममण्डले ॥ 4

वायुतत्त्वं समुद्भूतं स्पर्शतन्मात्रसंभवम् ।
वह्नेर्दशगुणं तिभूम्ना शब्दस्पर्शगुणं चलम् ॥ 5

आपाहप्रबलादीनां स्तावन्नामेककारणम् ।
अन्तः शरीरे सर्वेषां प्राणाद्याकार त स्थितम् ॥ 6

सर्वाकारविकाराणां निमित्तं परिणामिनाम् ।
वायुतत्त्वस्थितं वित्तं भुवनानामथाष्टकम् ॥ 7

गयास्थानं गुरुक्षेत्र नखलं नाखलं तथा ।
विमलं चाट्टहासं च माहेन्द्रं भीममेव च ॥ 8

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

प्रती मह्याभिधे ह्येतद्वायोरावरणे स्थितम् ।
वायोर्वह्निसमुत्पन्नो रूपतन्मात्रसंभवः ॥ 9
उपेतः शब्दस्पर्शाभ्यां रूपेण च मरुत्सखः ।
अम्भस्तत्त्वा द्दशगुणमस्यावरणमीरितम् ॥ 10
ऊर्ध्वज्वलनरूपोऽयमूष्मणो भास्वराकृतिः ।
वचनः सर्वभूतानां तपनश्च विशेषतः ॥ 11
प्राणिनामुदरावासो वैशा · नरसाह्वयम् ।
भुक्तं पचति चाहारं प्राणोपेतश्चतुर्विधम् ॥ 12
विद्युत्सूर्यादिभेदेन जगद्भासतेऽखिलम् ।
जातवेदा अपां योनिर्देवाना मुख्यमाननम् ॥ 13
जाज्वल्यमानो पतिते ज्वालाभिर्जातवेदसि ।
भुवनानि च स · त्रैतेसानि समन्ततः ॥ 14
हरिश्चन्द्र श्रीशैल जलपेशाम्रातिकेश्वरम् ।
महाकालं च मध्यं च केदारं भैरवं तथा ॥ 15
वसन्त्येषु महारुद्रा श्रीकण्ठाज्ञानुवर्तिनः ।
बलैश्वर्यमदोपेतै रुद्रैरष्टभिरावृताः ॥ 16

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अतिगुह्याद्भिस्तेषा हेमाभं भुवनाष्टकम् ।
अनेकभोगसंपन्नो राजते जातवेदसि ॥ 17

ततः समु . . . न्तत्वन्तत्वविदा वराः ।
रसन्त . त्रसंभूतं भूतं भूतेश्वराज्ञया ॥ 18

शब्दस्पर्शं च रूपं च रसश्चेति चतुष्टयम् ।
अन्तस्तत्त्वे विजृम्भन्ते स्पन्दमानस्वधर्मिणि ॥ 19

जीवसंजीवनं ह्येतज्जीवनं रूपलक्षणम् ।
पृथिवीतत्त्वते भूम्ना जलं दशगुणोत्तरम् ॥ 20

आधारं मधुरादीनां रक्तमांससिरात्मकम् ।
एते ह्यपान्ततत्त्वे वसन्त्याप्तमरोरथाः ॥ 21

रुद्ररौद्रबलोपेता पवित्रे भुवनाष्टके ।
क्रमेण तेषा नामानि भवनानां निबोधतः ॥ 22

अमरेशं प्रभासं च नैमिशं पुष्करं तथा ।
आषाढीशं च डिण्डीशं भारभूति चला . . ॥ 23

एतानि यस्य संज्ञानि निवसन्ति जलावृतौ ।
भुवनान्यत्र भव्यानि भवाज्ञा तानि ता . न . ॥ 24

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जलन्तत्रानयो जातं पार्थिवं तत्त्वमद्भुतम्।
विकारो यस्य विपुलं भाति ब्रह्माण्डमण्डलम्॥ 25

भूकटाहावधिर्मूले श्रीकण्ठभुवनावधिः।
अग्रे यस्य महीकार्यं ब्रह्माण्डमिति कीर्तितम्॥ 26

ब्रह्माण्डाधारा रुद्रान्तं मूले कालानलावधि।
ब्रह्माण्डं परिणाहेन नानाभुवनमण्डितम्॥ 27

महामण्डलख्यातं मुच्चाधा कोटियोजनम्।
कालाग्निरुद्रभुवनादुपरिष्टाच्च वर्तते॥ 28

तदधः कालरुद्राख्यो रुद्रो रौद्राकृतिर्महान्।
तदीशैरावृतो रुद्रैस्तद्वासा बुधान्वितैः॥ 29

कोटियोजनमानं तु कालाग्नेर्भासुरं महत्।
कालाग्नेः कायनिष्क्रान्तज्वालास्त्रैलोक्यदीपनाः॥ 30

दशकोटिसमुच्छ्रेयाः विलसन्ति दिशो दश।
सहस्रद्विविस्तीर्णं तस्य सिंहासनं स्मृतम्॥ 31

बाणबाणासनोपेतः खेटखड्गोल्लसत्करः।
चतुर्बाहुस्त्रिणेत्रोऽयं स्थितः षट्कोणविष्टरे॥ 32

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तज्ज्वलज्वालसंतप्त द्रवत्काञ्चन भूमिकम् ।

कोटिभिः सप्तदशभि भुवनं तस्य चोच्छ्रितम् ॥ 33

तदूर्ध्वे नरकस्थानं यातनैकनिकेतनम् ।

एकं पातकीनामेकं रौरवादि विभेदतः ॥ 34

चतुःसहस्रसंख्याता नरकाः प्रविभागतः ।

चतुस्त्रिंशन्निरयं मुख्यास्तेषु तत्रात्रयम् ॥ 35

8-A उपर्युपरि संस्थाना निरयास्तीव्रयातनाः ।

रौरवं प्रथमं प्रोक्तं महारौरवमेव च ॥ 36

संतापने पद्मसंज्ञं शीतोष्णं च महाद्वकम् ।

श्रीमुख्यं क्षुरधाराख्यमसिधारं सुकम्बलम् ॥ 37

सूचिमुखं कृष्णसूत्रं वर्गोऽयं रौरवादिकम् ।

कुम्भीपाकप्रधानाश्च नरकास्तान्निबोधतः ॥ 38

कुम्भीपाकः खरभानौ अङ्गारनिचयस्त्रयः ।

तीक्ष्णतुण्डे हृते च्छेदं त्रपुषं तप्तवालुकम् ॥ 39

अस्थिभङ्गं तप्तलेप मदस्त्रक प्रयोदवादकौ ।

अथो अवचिरायास्या निरुच्छ्वासस्ततः परः ॥ 40

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शिवी वै वैकरी अभ्रः प्रतिमासानुभक्षकः।
पर्वतः कृमिनिचयो जातुषंकश्च लोहकः॥ 41
अवीचिं नायका ह्येत नरकास्तोत्रप्रधानताः।
अवीचिः क्रिमिसंपूर्ण कुम्भीपाकश्च दाहकृत॥ 42
विट्पूर्णो रौरवः प्रोक्तो नरकप्रभवो मताः।
एतेषां च त्रयाणां तु सप्तसप्तावृतैस्तथा॥ 43
त्रिंशदेकोननरकाः आवृताश्च त्रिभिः।
आभिरव्याता नरकास्ते चत्वारिंशच्छताधिकाः॥ 44
तेषु च ब्रह्महास्तेय सुरापो गुरुदारगः।
पितृमातृगुरो हीत देवद्रव्यापहारकः॥ 45
नास्तिरो निष्ठुरः क्रूरः पिशुनो हिंसकस्तथा।
दत्तापहारी कृतोभिश्छिवशास्त्र विदूषकाः॥ 46
अन्योऽपि पापिनः सर्वे व्रजान्ते जीववेदनाः।
नरकाणामथैकैकमुच्छ्रायो नवतिर्नव॥ 47
अन्तरं लक्षमात्रं तु शतलक्षमथोच्यते।
नरकाणां च सर्वेषामुच्छ्रायं तु त्रिकोटियुक्॥ 48

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

शतलक्षसमायुक्तमुपर्युपरि संस्थितम्।
नरकाणामुपर्येषां त्रिंशत्साहस्रमन्तरम्॥ 49
कूश्माण्डो नरकाधीशः शासयत्सर्वपापिनः।
सहस्रयोजनायामो वपुषा दीप्ततेजसा॥ 50
नवत्या नवभिश्चापि योजनैर्व . तः पुरा।
पातालाधस्तने तस्मिन्नास्ते . . नामनि॥ 51
तदूर्ध्वसप्तपातालाः शतलक्षान्तरालकाः।
द्वात्रिंशत्कोटिभिर्मध्यं योजनैरन्वित द्विजाः॥ 52
महातलं च सुतलं रसातलमतः परम्।
गभस्तितलमाख्यातं शार्करं तलमेव च॥ 53
- - . . . माख्यातमुपर्युपरि संस्थितः।
देवदानवदैत्येन्द्रराक्षसाश्चत्रसस्तथा॥ 54
वसन्ति मुदितात्मानः सप्त पातालभूमिषु।
तदूर्ध्वं हाटकपुरे हाटकाख्ये महेश्वरः॥ 55
हाटकाभरणोपेतो रुद्रैः क्रीडन्ति सर्वदा।
पातालहाटकयास्तेषामधिपतित्वतः॥ 56

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

हाटकेश इति ख्यातो व्योमकेशो महेश्वरः।

तत्पुरस्यापि विस्तारः कोटियोजनविस्तृतः॥ 57

तस्योच्छ्राया समुद्दिष्टो नवभिर्लक्षयोजनैः।

इति कामिकाख्ये महातन्त्रे

विद्यापादे

अष्टादशः पटलः॥

श्री

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ईश्वरः —

भूकटाहसमुच्छ्रायात्पञ्चाशत्कोटि विस्तृतम् । स्तु

तस्योपरि समुद्दिष्टो भूलोकं कथ्यतेऽधुना ॥ 1

समुद्रैः सप्तभिर्वृतो द्वीपैरपि च सप्तभिः । द्वी

नानाजनपदाकीर्णो नानाजनसमाश्रयः ॥ 2

अनेककर्मभोगाढ्योऽनेकाचारनिकेतनः ।

विचित्रविपुलाभोगो नानानदनदीनगैः ॥ 3

मध्ये भूमण्डलस्यास्य मेरुः शिखरिणां वरः ।

स्वर्णरूपोऽतिविस्तीर्णो संकुचन्मूलमण्डलम् ॥ 4

नवलक्षाग्रविस्तारस्तदूर्ध्वे कर्णिकाकृतिः ।

भूमेरधः प्रविष्टस्तु सहस्राणि चतुर्दश ॥ 5

दृश्योऽशीतिसहस्रेण मेरोरुपरि संस्थितः ।

तस्याग्रे योजनैर्दिव्या चतुर्दशभिरन्विताः ॥ 6

तेलो? सभा सकलसंभूते लोकसूते महात्मनः । मं/

नाम्नामरावती प्रोक्ता सिद्धसाध्यादि संकुला । 7 आर्षं

ज्योतिष्कं नाम शिखरे सभा सकलभासरः ।

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

आस्ति श्रीकण्ठनाथस्य विंशत्साहस्त्रसंमिता । 8
यत्र रत्नमये हर्म्ये स्फुरन्माणिक्यतोरणे ॥
श्रीकण्ठो गिरिजाकण्ठो संश्लेषोत्कण्ठकान्तरम् । 9
आस्ते समस्तैर्विहरं हरो रुद्रगणैः सह ॥
तस्योकण्ठो वैकुण्ठभृङ्गे वैकण्ठनायकः । 10
चतुर्दशसहस्त्रैश्च योजनैः संमिते पुरे ॥
विश्वमूर्तिर्वासुदेवो सदास्ते त्रिदशैः सह । 11
ब्रह्मविष्णुशिवा एव भूलोका . जिघृक्षवः ॥
मेरोरमरवर्यास्ते शिरस्वेव सन्ति हि । 12
ब्रह्मविष्णुमहेशान भुवनानां समंततः ॥
अष्टानां लोकपालानां भुवनानि चकास्तिः । 13
पुरस्तात्पुरुहूतस्य पुरी नाम्नामरावती ॥
अमरैरखिलैर्जुष्टे विशिष्टाः सकलैः सुरवैः । 14
तेजोवती महातेजा नगरी जातवेदसः ॥
जातरूपमयी भाति वह्नेर्वा दिति भावने । 15
दक्षिणस्यामयाशायां कृतान्तस्य महात्मनः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पुरी संयमनी नाम मेरोरुपरि वर्तते । 16
नैरृत्यां दिशि पुरी नाम कृष्णा स्याराक्षसेशितुः ॥
आस्तेन्वीर्यमतो दुक्ते रक्षोलक्षैः सुरक्षितम् । 17
पुरी शुद्धवती नाम प्रतीच्यां च प्रचेतसः ॥
नदीनदसमुद्रैश्च मूर्तिमद्भिर्निषेविताः । 18
अग्रे मेरोश्च वायव्यां वायोर्गन्धवती पुरी ॥
आस्ते भोगसुखोद्रिक्तैर्वायवी यैः समावृता । 19
महोदयाभिदो दिव्यां राजराजस्य राजते ॥
पुरी पुण्यशतप्राप्या वृता पुण्यजनैर्मुने । ? 20
पूर्वोत्तराया माशायां पु . . पशुपतेः पुरी ॥
यजोवतीति विख्याता प्राप्ता प्रथमकोटिभिः । 21
स . . . सयोजनाया मापूस्तौ लोकरक्षणाम् ॥
अनेकैरावृता भाति संपूर्णैरमरैः पुरैः । 22
अनेकदेवताधारः स मेरुः काञ्चनाचलः ॥
वर्तते परितः शैलमन्दरो गन्धमादनः । 23
विपुलाद्रिः सुपार्श्वश्च दिक्षु पूर्वादिषु क्रमात् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

पीतवर्णाः सुपार्श्वादीन् नीलाभो विपुलाचलः। 24
गन्धाद्यो मादनारक्तः श्वीराभश्च समन्दरः॥
पञ्चाशद्भिः सहस्रैश्च योजतनैरायता अमी। 25
चत्वारस्त्याष्टसाहस्र चत्वारिंशच्छतोच्छ्रतः॥
मूलभागे तथाग्रे तु ततो द्विगुणिविस्तृतः। 26
मन्दराद्रेर्महाशृङ्गे कदम्बाख्य महीरुहः॥
सहस्रस्कन्धसंवीतो मानात्साहस्र योजनः। 27
पत्राणिशङ्खतुल्यानि कुसुमोपमम्॥
जम्बूतरुस्त्रिसाहस्र योजनोच्छ्रेय बन्धुरः। 28
सहस्रद्वितयायाम स्कन्धसन्दोह मण्डितः॥
शतभारसमापूर्णा फलकीर्णा शिखाकुलः। 29
आभाति विसरजन्धे गन्धमादनमूर्धनि॥
ण्प वचेलिम फलोद्भूतरसस्रोतोभिरुत्कटैः। 30
नदीर्वेगवती नाम प्रवर्तयति पादपः॥
दिशस्तदम्बुसंस्पृष्टं जाम्बूनद समाह्वयम्। 31
सुपर्णं भवति प्रोद्यच्छुताशनशिखानिभाम्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

वेगवद्यत्मा तया नदापरीतः सुरभूधरः । 32

तदम्बुसिक्तसर्वाङ्गो हेमरूपस्ततो . .

8-B तन्नदीतीरतरवस्तत्रस्थाश्च शरीरिणः । 33

हेमाभा विपुलं भोगं भुञ्जते पीत तत्र सः ॥

सहस्रयोजनोत्सेधः पिप्पलो विपुलस्य च । 34

पवनः पश्चिमद्वीपः शेखरः शिखरे त्वनः ॥

सुपार्श्वपर्वततटे वटो विटपिनां वरः । 35

वाधि श्रमसमो मध्ये वर्तते वर्तुलच्छदः ॥

वनं चैत्ररथं चित्रैः सुमनः फलपल्लवैः । 36

मन्दगन्धवहा पीतं वर्तते मन्दराचले ॥

आनन्ददं सुरादीनां नन्दनं गन्धमादने । 37

मदयन् मत्तगन्धर्वै मदतीमन्दरास्थितम् ॥

विभ्राजते वनं नाम्ना वैभ्राजं विपुलाचले । 38

सुमनो मधुस . ादन्मधुलिट् पाटलाकुलम् ॥

सुपार्श्वभूभृतः पार्श्वे वर्तते विपुलं वनम् । 39

कुबेरपुरकान्तानां जलक्रीडा वनस्पदम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अरुणोत्पलसंकीर्णारुणोद्यभिधं सरः। 40
तिष्ठति स्वच्छसलिलमन्दरे चारुकन्दरे॥
तरङ्गमाला विहरं मरालकुलमण्डितम्। 41
मनसोल्लासनं भाति मनसं गन्धमादने॥
विपुलाद्रेस्तटे रम्ये तटाकं विपुलोदकम्। 42
विहरदिव्यललनावच्चरद्विपुलोदकम्॥
उद्यानोद्योतितप्राप्तं कान्तनाम्ना मनोहरम्। 43
पार्श्वे सुपार्श्वशैलस्य रस्यत्युत्पलसंकुलम्॥
मध्ये संहिता भूमिरेवं रूपेण मेरुणा। 44
लवणाम्बुधिसंवीतो जम्बूद्वीप उदाहृतः॥
लक्षयोजनविस्तारो मेरुमण्डितमध्यमम्। 45
लक्षयोजनमानेन क्षारोदेनोपलक्षितः॥
ततो द्विगुणविस्तारः शाकद्वीपो बहिः स्थितः। 46
इक्षूदकसमुद्रेण तावतैव समावृतः॥
ततो द्विगुणमानेन कुशद्वीपः प्रकीर्तितः। 47
सुरोदेन समुद्रेण तावता परितस्थितः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

द्विगुण कुशद्वीपात्क्रौञ्चद्वीपो बहिस्थितः। 48
तावत्सर्पिः समुद्राम्भः सिक्त पर्यन्त मण्डलः॥

द्वीपोऽन्यः शाल्मलो नाम द्विगुण क्रौञ्चनामतः। 49
तावत्प्रमाण दध्यब्धि संसिक्त प्रा भूतलः॥

द्वीपयज्ञो ग्निदो नाह्यो ततो द्विगुणविग्रहः। 50
क्षीराब्धिजल कल्लोल मालासंकुलत स्थितः॥

ततः पुष्करनामास्ति ततो द्विगुणविस्तरः। 51
तावत्प्रमाण स्वादूद संवृतः परितो ह्यसौ॥

मेरो स्वादूदपर्यन्तं प्रमाणं पञ्चकोटयः। 52
सप्तलक्षसमोपेतः योजनानां च संख्यया॥

सप्त द्वीपाधिप प्रोक्तो मनुः स्वायम्भुवः पुरा। 53
प्रियव्रतस्तस्य पुत्रो द्वीपान् सप्ताप्यपालयत्॥

तस्य पुत्रदशोद्भूता अद्भुत क्षात्रशालिनः। 54
त्रयोत्र विरताः सप्त सप्तद्वीपानपालयत्॥

जम्बू द्वीपवतीस्तत्र प्रियो व्रतसुतोऽग्निधृक्। 55
न च्यानान्तिजपुत्राणां जम्बूद्वीपं विभक्तवान्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अनादिप्रथमः पुत्र स्थितः किंपुरुषो हरिः। 56
तनयाद्दतभत् भास्त केतुमालाश्च पुष्पकः॥
हिरण्मयः पुरुषश्चेति नवखण्डाधिपास्ततः। 57
त्रयः खण्डादुदग्देशे त्रयः खण्डाश्च दक्षिणे॥
त्रयः पूर्वे परे मध्ये नन्येत भूदन्तराः। 58
हिमाद्रि हेमकूटोऽद्रिनिषधश्चेति दक्षिणे॥
नीलश्वेतस्त्रिशृङ्गं च मेरोरुत्तरवर्तिनः। 59
पूर्वापरसमुद्रान्ता गिरियो दक्षिणोत्तरा॥
पूर्वापरौ गिरौ मेरोः माल्यवद्गन्धमादनौ। 60
हिमवद्दक्षिणोभागे त्रश्रृंगस्योत्तरे कुरुः॥
पतिस्तस्य धनः पापा नवसाहस्रगा महि। 61
कल्पद्रुमफलाक्षार देशे हेममये जनाः॥
त्रयोदश सहस्रायुर्जीविनो निवसन्ति हि। 62
द्वित्रापत्यप्रसविता श्यामकर्म गतक्लमाः॥
सूर्यकान्ते महोच्छ्राय श्चन्द्रकान्तः सुलो·नः। 63
राजनाम्नैव ते ख्याताः कुरवो मुनिपुङ्गवाः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तत्प्रान्त लवणाब्धौ द्वीपौ चन्द्रकभद्रकौ । 64
तत्र स्वस्थ जनस्यायु सहस्राब्द प्रमाणकम् ॥
देशं हिरण्मयं भाति त्रिश‍ृङ्गं श्वेतमध्यमम् । 65
नवसाहस्रविस्तारस्तन्नाना प्रथितं महत् ॥
तत्रस्ताश्चन्द्र धवला वर्षसाहस्रजीविनः । 66
वकुलस्य फलाहारा जीना क्रीडन्ति निवृताः ॥
श्वेत नीलाद्रिमध्ये तु वर्षे रम्यकरक्षिते । 67
नवसाहस्रमानेन विस्तृतं पूर्वपश्चिमे ॥
वट द्रुम फलाहाराः नीलोत्पल दलप्रभाः । 68
द्वादशाब्दसहस्राणि तत्र जीवन्ति वासिनः ॥
समन्ता मेरुशैलस्य वर्षे ख्यातमिलावृतम् । 69
पूर्ववद्विस्तृतं मेरुभासा भासित नूतनम् ॥
जम्बूफलरसाहार जरारोग विवर्जिताः । 70
त्रयेदश सहस्राब्द जीवनस्तद्भवा जनाः ॥
क्षीराब्धेः पुरतो वर्षं गन्धमादनपश्चिनम् । 71
नाथनाम्ना समाख्यातं केतुमालेन पालितम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

तत्रत्याः पनसाराह्यामाः शोकविवर्जिताः। 72
जना निरामयाः सर्वे जीवन्त्ययुतवत्सरम्॥
केतुमालादिवत्प्रोक्तं दीर्घविस्तारमस्यतु। 73
दक्षिणे निषधस्याद्रेः हेमकूटस्य चोत्तरे॥
हरिवर्षाभिधो देशो नवसाहस्रयोजनः। 74
इक्षुखण्डरसाहारस्तारा भास्तत्र वासिनः॥
द्वादशाब्दसहस्राणि जीवन्ति विगतज्वराः। 75
वर्षं किंपुरुर्मध्ये हिमवद्धेमकूटयोः॥
विस्तारयामतः प्रोक्तं नवसाहस्रसंमितम्। 76
सुवर्णवर्णास्तत्र त्वा सहकारशनः॥
द्वादशाब्दसहस्राणि जीवन्ति सुखा निर्भराः। 77
दक्षण देशेस्तुषाराद्रेः रुत्तरे लवणोदधेः॥
प्रियं वृत्ते तनूजेन पालितेनादिना पुना। 78
ऋषभस्तस्य तस्य तनयास्तत्सुनहाररतो भवेत्॥
तन्नाम्ना प्रथितं वर्षं भारतं कर्मणास्पदम्। 79
चापकारं समुद्रान्तं नवसाहस्रयोजनम्॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

जरारोगभयोपेता नराश्चेष्टासमाकुलः। 80
महद्दुःखसुखोपेता क्षुद्रधान्यान्नभोजनम्॥
शताब्दजीविनः प्रायश्चतुर्युगवशानुगाः। 81
इदं भारतवर्षं च नवसाहस्त्रमन्तरे॥
इन्द्रिकचेरुनागाख्यस्ताम्रवर्णो गभस्तिमान्। 82
सौम्यगन्धर्ववरुणाः कुमारा भरतात्मजाः॥
तैरेव फलितत्वेन तत्तन्नामकमीरितम्। 83
7-A सागरान्तरित यावत्स्थलं पञ्चशतं स्मृतम्॥
आद्या कुमारिका द्वीपा म्लेच्छद्वीपाः प्रकीर्तिताः। 84
चतुर्वेदचतुर्वर्णा चतुराश्रममण्डितम्॥
गङ्गाद्यालिङ्गितं काशिं गुरुक्षेत्रादिचिह्नितम्। 85
एवंभूतं भूतधात्रिधाम कौमारनामकम्॥
सोमभागे हिमवतः कैलासः सोमसन्निहि। 86
सोमस्य सोमपूर्वस्य सौम्यं शृङ्गे निकेतनम्॥
राजते राजतेशैले राजराजसखो हरः। 87
विहराहरणी नेत्रा वर्णा स्वर्णवर्णया॥

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

निःसृतास्तस्य मुखतः सिद्धान्ताः सकला अपि । ८८
अङ्गद्वीपादि षड्द्वीपाः समुद्रेषु व्यवस्थिताः ॥

माहेन्द्रो मलयः सह्यः शुक्तिमान् पारियात्रकः । ८९
ऋक्षो विन्ध्यश्च सप्तैते भारते कुलपर्वताः ॥

रक्तालङ्कारसालं कालं कांकां महाद्विषाम् । ९०
रक्षिता राक्षसै शिष्टमलयाचलमेखला ॥

मलयोदधिमध्ये तु दुन्दुभि ऋषभो गिरः । ९१
मैनाकश्चक्रवालाख्यो मध्यस्थो बाडबामुखः ॥

सोमकेतस्तु वाराह नन्दनः पश्चिमास्पदे । ९२
द्रोणः कङ्कस्तथा चन्द्रश्चोत्तरे तु व्यवस्थितः ॥

पुष्कराख्ये महाद्वीपे खण्डद्वितयखण्डिते । ९३
मानसोत्तरनामास्ति वलयात्म शिलोच्चयः ॥

भ्रमत्यस्मिन् सभाचक्रं पथ स्वारुणसारथेः । ९४
स्वादूदमेरुपर्यन्तो विस्तारः पञ्चकोटयः ॥

लक्षं सप्ताधिकोपेतं यैजनैः परिकीर्तितम् । ९५
ततो हेममयी भूमिर्विस्तृता दशकोटिभिः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

लोकालोकाचलस्तत्र वर्तते वर्तुलाकृतिः । 96
सहस्रयोजनानाह उच्छ्रितो लक्षयोजनम् ॥
लोकपाला वसन्त्यत्र सिद्धामरनिषेविताः । 97
तदन्तराल एवायं भास्वान् विप्रकाशते ॥
तद्बहिर्नैव तेनासौ बहिस्तु तमसावृतः । 98
आलोकभावाभावाभ्यां लोकालोक स ईरितः ॥
गर्भोदधिस्ततो बाह्ये तमावृत्य प्रतिष्ठति । 99
तद्बहिः कोटिविस्तारं पार्थिवावरणं स्थितम् ॥
घनं ब्रह्मकटाहस्य कोटिविस्तारसंयुतम् । 100
मेरोस्तु पृथिवी पञ्चाशत्कोटियोजना ॥
ब्रह्माण्डोदरमाने तु कोट्याजनसंमिता । 101
भूलोकमिति वप्रोक्तं भुवर्लोके रविः प्रभुः ॥
लक्षयोजनविस्तारे तस्मिन् द्वादश भास्कराः । 102
वसवोऽष्टौ तथा रुद्रा अश्विनोऽस्य शिवाज्ञया ॥
ततो लक्षप्रमाणेन लोकश्चन्द्रमसः स्मृतः । 103
तस्मादप्यूर्ध्वतो लक्षमाननक्षत्रमण्डलम् ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

लक्षाद्द्वयादुपर्यास्ते बुधः सोमसुत प्रभुः । 104
एवं शुक्र स्वराचार्य रविजानां त्रिलक्षकम् ॥
उपर्युपरि संस्थानलक्षाः सप्तार्षयस्थितः । 105
Anyabhuta Jnana s. 155b
अत्रिर्वसिष्ठो नामैषां पुलस्त्ययः पुलहः क्रतुः ॥
भृग्वङ्गिरो मरीचिश्च लक्षादूर्ध्वं ध्रुवस्थितः । 106
स्वर्गलोको भवेद्ध्रौव मन्तरा चन्द्रलौकिकम् ॥
अद्रिकोट्यो जनितं महर्लोकस्ततः परम् । 107
धातृप्रजेशप्रमुखा वसन्ति ब्रह्ममूर्तयः ॥
सनकाद्या महर्लोके जनलोकस्ततो भवेत् । 108
पञ्चाशल्लक्षमात्रस्तु विधिना स्म विष्ठितः ॥
संकर्षणश्च प्रद्युम्नो वासुदेवोऽनिरुद्धकः । 109
मत्स्यकूर्मो वराहश्च नारसिंहोऽथ वामनः ॥
रामो रामश्च रामश्च कृष्णः कल्कीति सँन्त्यम् । 110
पूर्वादिदिक्षु दिशासु तथान्ये गरुडादयः ॥
अस्ति लक्षप्रमाणेन तपोलोकं भवे द्विजाः । 111
विद्याविद्येश्वरैः सार्धमनन्तेशो न्यवस्थितः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

अनन्तसूक्ष्मकश्चैव एकनेत्रशिवोत्तमौ । ॥२

एकरुद्रस्त्रिमूर्तिश्च श्रीकण्ठश्च शिखण्डिनः ॥

निवसन्ति भवो लोके सत्यलोकं निबोधतः । ॥३

सत्यलोकप्रमाणं तु कोटिद्वादशयोजनम् ॥

रुद्राः सहस्रसंख्याश्च अयुता नियतास्तथा । ॥४

अनेककोटिरुद्राश्च निवसन्त्यमृतात्मकाः ॥

तदूर्ध्वं ब्रह्मणो लोकः कोटित्रितयसंयुतः । ॥५

वेदशास्त्रैर्मूर्तिमद्भिर्यदास्ते यत्र पद्मभूः ॥

चतुष्कोटिप्रमाणेन तदूर्ध्वं भुवनं हरेः । ॥६

त्रिलोकी पालनो युक्तो यत्रास्ते कैटभाहितः ॥

तदुपर्युज्वलो लोकपञ्चकोटिप्रमाणतः । ॥७

ब्रह्माण्डपालना येत संस्थिताश्च त्रिमूर्तयः ॥

कोटिमानं कटाहस्य पञ्चाशत्कोटिविस्तृतः । ॥८

शतकोटिप्रमाणेन ब्रह्माण्डमिति कीर्तितम् ॥

ब्रह्माण्डधारका रुद्राः शतसंख्याः प्रकीर्तिताः । ॥९

एकैकत्रिदशैवेते दशदिक्षु व्यवस्थिताः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

कपालीशस्त्वजो बुद्धो वज्रदेहः प्रमर्दनः। 120
विभूतिरव्ययः शास्ता पिनाकी त्रिदशाधिपः॥

इन्द्रस्य बलमाक्रम्य प्रभुशक्तिसमन्वितः। 121
क्षयान्तको महातेजा रुद्रो भस्मान्तकस्तथा॥

बभ्रुश्च ज्वलनश्चैव परश्चैव महाद्युतिः। 122
पिङ्गलः खादकोऽन्योऽपि हुताशनाग्निरुद्रकाः॥

एते वह्निदिशावास्था रुद्रा ब्रह्माण्डधारिणः। 123
नियोक्ता चैव संयोक्ता धर्माधर्मपति अपि॥

एकरुद्रा स्वधाकर्ता विधाता धातृसंज्ञकः। 124
रुद्रो मृत्युपरो याम्यो यमदिग्वर्तिनो दश॥

यमस्य बलमाक्रम्य वर्तते चाण्डधारकाः। 125
श्वेतभद्रश्च वैरी च रहितो धूम्रो विरूपाक्षस्तुरीयकः॥

ऊर्ध्वशेषो तथा रुद्रो भयान्तक समाह्वयः। 126
क्रूरदृष्टिनिहन्ता च मारणश्चेति कीर्तितः॥

नैकदो दमनः प्रोक्तो रुद्रा दश महाबलाः। 127
निऋते बलमाक्रम्य रक्षोभिरिति पूजितः॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

ब्रह्माण्डधारका ह्येते रुद्रा रौद्रपराक्रमाः । 128
भीषणो वाक्रोदीर्घबाहुर्जलान्तकः ॥

श्वेतश्च जयभद्रश्च पाशहृ . . . महा । 129
बलश्चातिबलश्चैव दशैते(ऽ)प्याशनो दिशि ॥

वारुणं बलमाक्रम्य वरुणेन सुपूजिताः । 130
ब्रह्माण्डं तद्दिशाभागे धारयन्ति धृतव्रतः ॥

मेषकेतुदिशो रुद्रस्तथा पञ्चशिखाह्वयः । 131
पञ्चान्तको महावीर्यो अतिसूक्ष्म क्षयान्तकः ॥

लघुश्च वायुवेगश्च शाक्रो वायव्य एव च । 132
दशैते मारुतीशाना सिताश्च महौजसः ॥

रुद्रा भद्रबलास्तत्र ब्रह्माण्डमणुयन्त्यमी । 133
कामरूपि प्रसीदश्च लक्ष्मीवांश्च प्रचण्डधृक् ॥

सौम्यदेहो परोऽन्यो वा रूपांश्च महाबलः । 134
निधीशो रक्तधारी च जटामकुटधृक् तदा ॥

कौबेरीं ककुभः प्रोक्ताः कुबेरबलनायकाः । 135
कुबेरवन्दिता नित्यं रुद्रा ब्रह्मधारकाः ॥

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

9-B. सुखदुःखकरो रुद्रः सर्वविद्याविधायकः । 136
बलिप्रियो भूतबलः पञ्चमः पिङ्गलाह्वयम् ॥
षष्ठो मातृवृतो रुद्रो सप्तमो वेदपारगः । 137
सर्वज्ञो ज्ञानभुक् प्रोक्ता परे विद्याधिपस्मृताः ॥
ईशानादीशमाक्रम्य . . ज्ञानयन्त्ररम् । 138
ईशान पूजिता रुद्रा धृतब्रह्माण्डमण्डलाः ॥
दशैते त्रिदशाराध्ये क्रीडन्त्यद्भुतविक्रमाः । 139
विचक्षणो बिल्लिष्ठोऽन्यो तृतीयस्तु नभो मतः ॥
सं . . . . गणाध्यक्षसुरार्चितः । 140

[अपूर्णः]

Copied from a ms.
with no. RE40.042
of this Institute (IFI)

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

K. vidyā
19. 2a vita ?

19 2b laissemi de differents arbres
refuge de ttes sortes d'oiseaux
(above the line: ttes sortes)

nānā nada nadī napaca
male female rivers — mortagne

svarṇārūpa

saṃkucan mūla maṇḍalam

meror upari

durvyā — ou (? durvyāś)

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

A

p. 111

16b B saṃyamanī

17ba B diśi puru kṛṣthā syā rākṣasteśchuḥ

17b B asto vīryado vipulaḥ sa ca +++ ?

18a — 34 manquent dans B

p. 113 36a B bādhidrumasamo

36b B. citrarathaṃ

37b B ānandanaṃ

38a B. ~~gandharvai~~ gandharvaimadati

38b B tamnā

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Kāmikāgama
Vidyāpāda.

Mss A = T. 8 = mss R.E 40042

Ms B =

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

A = bare

p.109 1a B. bhu—

1a A usatam - B ustṛtam

1b B tasojari

1b A, B bhūlokaṃ

2a A: dvi+airapi B: dvijaiapi.

3a. B: naikācāranaketanaḥ

4b B ustīrṇe

6a B: meruruhati

7a B. sabhā sakalabhāsaṃbhūterloka—

7b ~~B.~~ A. sādhyāodi

B sādhyārṣi

8a B ~~jyotsṭām~~ nāma śikhare ++++

jyotiṣṭhām ← sakalabhāsvaraḥ

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

A

h. 110 9a A. harmya ... māṇkya - - -
B harmye ... māṇkka - - -

9b A gunjākaṇṭho . . . kanthakāntaram
B gunjākaṇṭhasaṃśleṣotkaṇṭhitāntara

10a B ~ ucharanmoro

10b – 11 manquent dans B.

12a. B usṇuvo

12a A. bhūlokā + ji ———
B ——— nu ———

12b. B. meroramaravasyaste

12b A. śirasvera santi hi
B ——— ṃ vasanti hi

13b A: cakāstiḥ
B: cakāsati

14b. A juṣṭhe
B juṣṭhai

15b A: vahnervāditi bhāvane
B: vahner duryātibhāvane

16a B mathāśāyā

Center for Shaiva Studies, Pondicherry Collection

CC-0. In Public Domain. Digitization by Agam Nigam. Funding Tattva Heritage Foundation, Kolkatta and IKS-MOE

Center for Shaiva Studies, Pondicherry Collection